ARTHAVĀDĀDI VICĀRA

OF

KṢĪRASAMUDRAVĀSIMIŚRA

EDITED BY

Panditaraj

T. A. VENKATESVARA DIKSHITAR

BHARATIYA VIDYA BHAVAN

BOMBAY

1951

INTRODUCTION

The only reference to the work or views of this author is to be found in the following passages in the Śastradīpika Vyākhyā of Somanatha

1. स्पष्टं चात्र विषये प्रकरणं नास्तीति क्षीरसागरमिश्रेण तन्मतानुवर्तिना प्रतिपादितम्
(N. S. Press Edition Page 205).

2. इत्यस्मदुक्तरीत्यैव क्षीरसागरवासिनापि भाष्यं व्याख्यातम्
(N. S. Edition Page 596).

From these two extracts it is obvious that Somanatha regarded him an author of authority. The point dealt with the first of these extracts has its counterpart in the Prabhākara System as we know. This extract may lead us to infer that क्षीरसागरमिश्र composed perhaps an independent work in Mīmamsa, probably on the Prabhākara System.

The second extract refers to the commentary of क्षीरसागरमिश्र on the भाष्य. The subject dealt with is Somanatha finds in क्षीरसागरमिश्र an author to support the stand taken by him.

In the first of these references we find the views of क्षीरसागरमिश्र on some topic connected with 12th adhikarana in the first pada of the third अध्याय. The second—with the 14th adhikarana of the first pada of the 9th अध्याय. None of these could obviously have any reference to the matter contained in the present work. The suspicion naturally arises whether the present work is complete or not. If it is complete, has the author written any other treatise where these topics are found?

Now, as a matter of fact, we have another work called Bhāshya-Dīpa, a commentary on the Bhāshya of Śabarasvāmin by a क्षीरसागरमिश्र. The original is in Sringeri and a transcript at Adyar. The manuscript as available at present extends to the 8th अध्याय.

* * * *

A perusal of the commentary is enough to show that he was a follower of the Prabhākara School.

Is the author of the BHĀSHYA DĪPA and the present work identical?

It has been the practice of several writers to compose definite treatises on particular adhikaranas or groups of adhikaranas. For instance, Murāri Misra wrote the Tripādinitinayana based on only three padas. He again wrote a small pamphlet calledएकादशाध्याधिकरणविचार. Chandra in his न्यायरत्नाकर deals only with 11th अध्याय. Similarly क्षीरसागरमिश्र too probably composed his commentary on the Bhāshya and wrote independently on the अर्थवाद and other adhikaranas.

Though we do not have any definite clue regarding the date of the author, he seems to have been a fairly old writer.

The Sringeri manuscript of Bhāshya Dīpa is at least 400 years old. And Sōmanātha who belongs to the period anterior to Rhandadeva refers to him. The author probably flourished much earlier than 11th or 12th century as the period of his activity may not be far from the correct date of the author.

The word क्षीर as part of the author's name makes one associate the region round about the क्षीर river with the nativity. The क्षीर river is the same as the Pālār which falls into the sea about 40 miles south of Madras.

1. क्षीरसमुद्र is very probably the same as Tiruppārkadal, a place very near Kanchipuram in the Chingleput District of the Madras Presidency.

2. The authors of the अर्थवादादिविचार and the Bhāshya-Dīpa are both called क्षीरसमुद्रवासिमिश्र and in all likelihood were identical with each other.

3. The available manuscripts of the भाष्यदीप begin from the second अध्याय and end with the 8th अध्याय.

4. The following Colophon is found in it:—

इति महोपाध्यायक्षीरसमुद्रवासिमिश्रेण विरचिते भाष्यदीपे

etc.

The present edition is based on a single manuscript of the work now deposited in the office of the Curator for Manuscripts in the Trivandrum University.

T. A. VENKATESWARA DIKSHITAR.

॥ श्री: ॥

क्षीरसमुद्रवासिमिश्रप्रणीतः

श्री आचार्य—पण्डितराज वेङ्कटेश्वरदीक्षितविरचित टिप्पणीसमेतः

॥ अर्थवादादिविचारः ॥

अर्थवादानां[1] स्तुत्यापि विधिपदेनैकवाक्यत्वं सम्भवति नवेति विचार्यते । न सम्भवतीति पूर्वः पक्षः । एकवाक्यत्वं हि नाम यत्प्रयोजनं[2] तदन्वय्यर्थानां इतरेषांच तदन्वितप्रतिपत्ति-निमित्तता। येषां तत(देक) प्रयोजनत्वमर्थया [र्थवा] दानां तेषामेकवाक्यत्वम्[3]। यथा लिङ्पद-करणेतिकर्तृता [कर्तव्यता] नियोज्यपदानाम्। तत्र लिङ्पदं करणाद्यन्वितं नियोगं प्रतिपादयति । करणादिपदानि नियोगान्वितकरणादीनीति तेषामेकएव नियोग: प्रयोजनम् ।[4]ननु कथं तेषां नियोगमजनयतां तत्प्रयोजनत्वम् ? नियोगसिद्धि (हेत्व) नुष्ठाननिमित्तभूतसाधन विशेषानुष्ठानाक्षेपनिमित्तत्वात् । तथाहि—यागादिपदार्थभेदेषु नियोगसाधनतया (वगतेषु) पदेषु यागाद्यन्वयितया नियोज्यविशेषान्वयितया, च नियोगेऽप (ऽव) गते तस्य नियोज्यविशेषस्य नियोगसाधनीभूतयागादिपदार्थभेदानुष्ठानबुद्धिरुपजायते । जातानुष्ठानबुद्धिश्चानुतिष्ठति । अनुष्ठानाच्च यागादयो निष्पद्यन्ते । निष्पन्नाश्च यागादयः व्यपान्त [अवान्त] रापूर्वाण्या-रभन्ते; तानि च परमापूर्वम् इत्येवं प्रयोजनभूतनियोगनिष्पत्तौ परम्परया निमित्तभूतानामेक-प्रयोजनतया भवत्येकवाक्यत्वम्। नन्वेवमारादुपकारवर्तिनां [नियोज्यादि यज्यादि] शब्दानां कथमधिकारवाक्यस्थलिङ्शब्देनैकवाक्यत्वम् ? ते हि स्ववाक्यस्य लिङ्शब्दाप [ब्दाव] गम्यावान्तरनियोगान्वितान् स्वार्थानभिदधति, नाधिकारनियोगान्वितान् । तदन्वितं चाधिकारनियोगमधिकारवाक्यस्थलिङ्शब्द एव प्रतिपादयति, न समिदादिवाक्यस्थ यज्यादयः—इति कथं तेषामेकवाक्यत्वम् ? । इत्थम्. समिदाद्यन्वितनियोगबुद्धौ तावत् समिदादि सन्निधिरपेक्षितः । तं च[5] कुर्वन्ति समिदादिपदानि स्वार्थान्वितनियोगबुद्धिनिमित्तानि । तथा समिदादिनियोगान्वयनिर्वाहकावान्तरापूर्वान्वयप्रतिपादकतयापि समिदाद्यन्वितनियोगप्रतिपत्ति निमित्वं वेदितव्यम् । वाक्यस्थलिङा तु परमापूर्वगृहीतसमिदादियागविषयान्वययोग्यत-यान्तर्भावितपरमापूर्वसाधनत्वमेवावान्तरापूर्वं स्वार्थं इति तेषामपि नियोगान्वितस्वार्थप्रति-पादकतया तदेकवाक्यत्वम् । तथा[6] सन्निपात (ति) वाक्यवर्तिनामपि पदानामपूर्वतत्साधन विशेषान्वितस्वार्थप्रतिपादकतया अधिकारलिङ्शब्देनैकवाक्यत्वं वेद्यम् । एतेन, येषां पदार्थानां

---

१. स्तुत्यापि—लक्षणया अवबोधितया इत्यादिः, शक्त्या अवबोधितया, वायुः शीघ्रगामिनी देवता इत्येवमादि रूपया कथया तु दूरापेतमेकवाक्यत्वं विधिनेति हृदयम् ॥

२. तदन्वय्यर्थानां—तच्छब्दः प्रयोजनपरामर्शी तदन्विताः अर्था येषां पदानां—

३. एकवाक्यत्वं द्विविधम् । प्रयोजनान्वितस्वार्थाभिधायकानामेकम्; प्रयोजनान्वितप्रतिपत्तिनिमित्तत्वं येषां तेषामन्यत् ।

४. ननु कथं तेषां नियोगमजनयतां तत्प्रयोजनत्वम्? स्वर्गादिजनकानां यागादीनामेव स्वर्गप्रयोजनस्य दृष्टत्वादित्याशयः ॥

५. कुर्वन्ति—सुबन्तशब्दोयम्

६. सन्निपातिवाक्यवर्तिनां—सन्निपत्योपकारकाङ्गजातविधायकवाक्यघटकानाम् ।

अधिकारापूर्वीयपदार्थस्वरुपेणैवान्वयो नाधिकारापूर्वेण, कत्व (तत्प) दाना मधिकारलिङ्ग शब्देनैकवाक्यत्वं निरस्तं वेदितव्यम्। यथाच ऋग्वि (त्विक्) वरणयूपच्छेदनपाणियमादिपदानाम्।

नन्वेवं सति मन्त्रपदानां कथमधिकारलिङ्गशब्देनैकवाक्यत्वम्? उच्यते, मन्त्रेषुहितावत् किंचिदननुष्ठेयार्थं पदम्; तत्रानुष्ठेयार्थेन पदेन निर्वपत्यादिना अन्तर्भावितापूर्वसाधनभावोऽनुष्ठेयार्थव (वत्) स्वार्थ इतरपदार्थान्वितोऽभिधीयते । तत्रेतराणि पदानि स्वार्थान्वितापूर्वीयसाधनप्रतिपत्तिनिमित्तानिः, तैर्विना प्रतियोगिसान्निध्याभावादन्वितापूर्वायसाधनाभिधानानुपपत्तेः । अनुष्ठेयपदंच साक्षादपूर्वसंबन्धिसाधनाभिधानं करोति । तच्चाभिधानं परंपरया नियोगोपकारकमिति तेषां नियोगशब्देनैकवाक्यत्वं वेदितव्यम्। यानि नु अवान्तरापूर्वसाधनाभिधानानि तेषामपि तल्लिङैकवाक्यत्वम् । यानि तु विद्युद्देशस्थानि लाक्षणिक गौणपदानि, तेषामपि स्वोपस्थापितपदार्थान्वितनियोगप्रतिपत्तिनिमित्तत्वानि (त्वान्नि)-योगशब्देनैकवाक्यत्वम् । विद्वद्वाक्ययोरपि अधिकारवाक्य सं(स्थ)यजिसर्मापि तत्र...कद्व (तन्निकद्वय) यागप्रतिपत्तिनिमित्ततया तदेकवाक्यत्वम् । उभयपरस्यापि हविःपदस्य सान्नाय्यवर्तित्वे प्रमाणभूतस्य सान्ना... (य्य हवि) रार्तिमन्नियोज्यपरत्वान्नियोग शब्देनैक वाक्यत्वम्। तथा येऽपि प्रकृतिप्रत्ययादयो विवक्षितार्थाः, तेऽपि[3] प्रकृतिप्रत्यययोरन्यतरस्य प्रयोगसाधुत्वसंपादनेन तत्तदन्वय्यर्थप्रतिपादनपरा इत्यवगन्तव्यम्। अर्थवादपदानि तु नान्यान्वितनियोगं प्रतिपादयन्ति, नापि नियोगान्वितमर्थम्। ननु नियोगः कार्यतया प्रतीयते। कार्यबुद्धेश्च प्राशस्त्यबुद्धिरपेक्षिता । यद्धि प्रशस्तं तदेव कार्यतया प्रतीयते । तच्च प्राशस्त्यं नियोगगतं बोधयन्त्यर्थवादपदानि नियोगप्रतिपत्तिनिमित्तानि इति चेत् तदयुक्तम् । तथापि तत्प्राशस्त्यं नियोगेन सह प्रतीयते अप्रतिपन्ने, अथवा प्रतिपन्ने नियोगे न तावदप्रतिपन्ने। न हि निराश्रयं प्राशस्त्यं प्रत्येतुं शक्यते। प्रतिपन्ने चेत्; कथं नियोगप्रतिपत्तिकारणत्वम्? सह प्रतिपत्तावपि कारणत्वानुपपत्तिः। किञ्च कार्ये तावत् लिङ शब्दोष्यु (ब्दोव्युत्प) न्नः । स तद्बोधने प्राशस्त्यज्ञानं नापेक्षते। नहि यस्य शब्दस्य यस्मिन्नर्थे व्युत्पत्तिः, तस्य तद्बोधने प्राशस्त्यज्ञानापेक्षा दृष्टा, यथा घटादिशब्दानाम् । किञ्च–नियोगगतं प्राशस्त्यं बोधयितुमर्थवादपदानां सामर्थ्यमपि नास्ति । न हि वायुक्षेपिष्ठादिपदैः नियोगे प्राशस्त्यज्ञानमुत्पद्यते। ननु—(मा) भून्नियोगे प्राशस्त्यज्ञानम्; तदन्वयिद्रव्यदेवतादिगतं प्राशस्त्यज्ञानंमुत्पद्यते ततात-गुणसंकीर्तनात् । तथा व [च] सति प्राशस्त्यविशिष्टान्येव द्रव्यादीनि नियोगसाधनतया प्रतीयन्त इति नियोगान्वितप्रतिपत्तनिमित्तित्वमस्ती चेत् तदपि न शोभनम्। प्राशस्त्यांशस्य विशेषणीभूतस्य नियोगान्वायित्वात् न तद्विशिष्टानां नियोगान्वयित्वम्। तस्यापि नियोगान्वयित्वेऽभ्युपगम्यमाने सति अङ्गत्वमङ्गीकरणीयम् । तच्च एकत्वादिवत् साप (साध)

---

१. पाणियमादिपदानाम्—पाणियमः मुष्टीकरणं हस्तगतचापलनिवृत्तिभाव्यकम् "मुष्टीकरोति" इतिवाक्यविहितम्। इदंच "वाचं यच्छति" इति वाक्यविहितस्य वाग्यमस्योपलक्षणं वेदितव्यम्। अथवा "मुष्टी" इति शब्दः मुष्टीकरणं, यमशब्दश्च वाग्यममर्धोक्तिन्यायेन लक्षयति॥

२. "यस्योभयं हविरार्तिमार्छति" इति वाक्यस्थस्येत्यर्थः॥

३. प्रकृतिप्रत्यययोरन्यतरस्य प्रयोगसाधुत्वसम्पादनेन "एक" "द्वौः" "त्रय" "कर्म" "करणेन" इत्यादिपुच प्रकृतिप्रत्यययोरुभयोरभिन्नार्थत्वेनैवमाहेत्यनुसन्धेयम्।

नपरिच्छेदकतया घटते नान्यथत्यप्रशस्तवाय्वादिनिकर्तकत्वं स्यात् । न चैतदिष्टम्, वाय्वादिपदेन यावन्मात्रं प्रतिपन्नं तावन्मात्रस्यैव नियोगान्वयित्वेनाभ्युपगमात् । किंच प्राशस्त्यमपि कीदृशमिति विदुः । कार्यसाधनमिति चेत्, तं (तत्) किं कार्यमात्र साधक[न]त्वम्, उत कार्यविशेष साधनत्वम् । तत्र कार्यमात्रसाधनत्वं चेत् कार्यविशेषसाधनत्वं बोधयद्भिरेव द्रव्यादिपदैः कार्य-मात्रसाधनत्वबोधोऽपि सिद्ध इति किमर्थवादपदैः । अथ कार्यविशेषसाधनत्वम्, तर्हि तैरेव साधनत्वबोधसिद्धेः द्रव्यादिपदानि किमित्यनर्थकानि भवन्ति ? अर्थवादपदैः विशेषकार्यसाधनत्व-बोधासिद्धिश्च । अथ कार्यसाधनव्याप्त : कश्चिद्धर्म : प्राशस्त्यं तद्बोधएव कार्यतद्व्यापकीभूत कार्यसाधनत्वबुद्धिहेतुत्वमिति । तथासति व्याप्ताद्व्यापकेबुद्धिरनुमानमिति नार्थवादपदानां शास्त (प्राशस्त्य) बुद्धयुपयोगित्वं स्यात् । किंचार्थवादपदानि परस्परसंसर्गं [1]बोधयन्ति किं प्राशस्त्य (स्त्यं) प्रतिपादयन्ति उत न बोधयन्ति ? न तावद्बोधयन्ति, अकार्यपदानां कार्यान्वितस्वार्थे अव्युत्पत्ते : न सिद्धा (द्धार्थ) परस्परसंसर्गप्रतिपादकत्वं संभवति । अबोधयतां च न प्राशस्त्य प्रतिपादकत्वम् । न हि वायुर्वैक्षेपिष्ठादिपदार्थेष्वसंसृष्टेषु प्रतिपन्नेषु कस्यचित् प्राशस्त्यबुद्धि-रुत्पद्यते[2]। कि च अर्थवादपदविभागे विद्वेध्युशस्य साकाङ्क्षत्वमपि नास्ति, पदान्तरावगत कारणादिभिरेवान्वितनियोगाभिधानसिद्धेः । द्वयोश्च पदयोः परस्परविभागे साकाङ्क्ष योरेवैकवाक्यत्वम् । तच्चेह नास्ति । तस्मान्नार्थवादपदानां विधिनैकवाक्यत्वं स्तावकतया [3]संभवतीति पूर्वः पक्षः ।

राद्धान्तस्तु—यावतां पदानामेकप्रयोजनवशीकृतप्रतिपत्तिपरत्वं संभवति तावतामेक-वाक्यानुगुणसन्निधिमत्तया प्रयुक्तानामेकवाक्यत्वमिति लोकेऽव्यु (लोकेव्यु) त्पन्नम् । संभवति चार्थवादपदानामपि विधिपदेनैकप्रयोजनप्रतिपत्तिनिमित्तत्वमिति तेषामितरेतरसन्निधिमत्तया प्रयुक्तानामेकवाक्यत्वं तावदवगम्यते । तच्चैकवाक्यत्वं प्रकारान्तरेणासंभवात् स्तावकतये-त्यवगम्यते । ननु स्तावकतयाऽपि न संभवतीत्युक्तम् । मैवम् । इह विधेयपदाधीनो यः स्वार्थस्य विधिं प्रति विषयत्वावबोधस्तदुपयोगितयार्थवादपदानां विधेयपदानामिव विधिपदैकवाक्यत्वं वेदितव्यम् । कथं पुनः विधेयपदाधीनबोधोपयोगित्वमर्थवादपदानामुच्यते । विधेयपदेन यत् स्वार्थस्य विधिविषयतयावबोधनं तत् तद्योग्यतास्मरणापेक्षम् । तच्च कार्यसाधनभाव-योग्यतास्मरणापेक्षम् । तद्योग्यतास्मरणमर्थवादपदानि कुर्वन्ति । [4]तथाहि—विधेयपदार्थस्य अभ्यु-दयविशेषनिमित्तत्वं प्रत्यवायपरिहारनिमित्तत्वं वा तावदर्थवादपदैर्गम्यते । तच्च द्वयमपि कृत्युद्देशार्हतया नियतं कृत्युद्देशार्हतां स्मारयति । सा च परतः कार्यपदार्थवर्तिनी कार्यसाधनभावार्ह-तया नियता तां स्मारयति । सा च विधिविषयत्वयोग्यताम्; कृत्युद्देशार्हतैव प्राशस्त्यम् । तदेव-मर्थवादगतं प्राशस्त्यं कार्यसाधनत्वयोग्यतां स्मारयति । सा च विधिविषयत्वयोग्यताम् ।

---

१. बोधयन्ति—सुबन्तः शब्दः ॥

२. अर्थवादानां, लक्षणया सन्निहितविध्येकवाक्यतया विधेयगतप्राशस्त्यबोधकतायाः, एव सिद्धान्ते स्वीकारात्, वाय्वदीनामप्रशस्तत्वाप्रसक्तेश्चेतिभावः ।

३. द्वयोश्चपदयोः परस्परविभागे साकाङ्क्षयोरेकवाक्यत्वम् । पदैकवाक्यत्वस्यैव तन्त्रान्तरेषु प्रसिद्धत्वेन वाक्यैक वाक्यत्वस्यचेतःपरमेव निरूपयिष्यमाणत्वेन च अर्थवादविध्योरेकवाक्यत्वमाक्षिपति पूर्वपक्षी ॥

४. तथाहि-विधेयपदार्थस्य निव्यनैमित्तिके काम्यं च मनसि कुर्वन्नाह ॥

तदनन्तरं च विधेयपदात्स्वार्थस्य विधियोगोऽवगम्यते इति विधेयपदाधीनबोधोपयोगितया विधिपदेनैकवाक्यत्वमर्थवादपदानाम्। ननु विधेयपदस्मारितो योऽर्थः तेनैव कार्यसाधनभावयोग्यत्वमेवंविधद्रव्यत्वमिति या प्रमाणान्तरेण योग्यतावधृता सा स्वसंबन्धिनी स्माते (स्मर्यते) यथा निरर्थवादपदावगतैः पदार्थैः। तथाच सति किमर्थवादपदानां योग्यतास्मरणेनोपयोगित्वमुच्यते? प्रयुक्तेऽ्वर्थवादपदेषु तदेकवाक्यताबलात् तज्जन्ययोग्यतास्मरणमेवान्वितप्रतिपत्तौ सहकारिकारणमित्याश्रीयते, यथा प्रयुक्ते प्रतियोगिपदा (पदे) तज्जन्यसन्निधिरेवान्विताभिधाने पदान्तरस्य सहकारिकारणं तथैतदपि। नन्वनेन प्रकारेणैकवाक्यत्वं न लोके व्युत्पन्नम्; किंतु यानि पदानि मुख्यं गौणं लाक्षणिकं वा प्रयोजनतदन्वय्यन्यतमरूपमर्थमुपस्थापयन्ति, तेषामेवैकवाक्यत्वं व्युत्पन्नम्। न चार्थवादपदानीदृशानीति कथं तेषामेकवाक्यत्वम्? श्रूयताम्— लोके तावत् 'इयं गौः कार्या' (क्रय्या) इत्यादिषु व्यवहारवाक्येषु तद्वाक्यश्राविणो ह्येवं परिकल्पयन्ति—इमानि तावदेकवाक्यभूतपदानि, इतरथैकं विशिष्टकार्यं प्रत्याययितुकामैः सहप्रयोगानुपपत्तेः। येभ्यो हि पदेभ्यो विशिष्टकार्यमवगम्यते अर्थान्तरमपि तावन्मात्र एव प्रयोज्यवृद्धप्रवृत्त्युपलम्भात्[1]। तच्च कार्यं 'गौः कार्या' (क्रय्या) इत्ये तावन्मात्रा (त्रं) दृष्टम्। तस्मादेषाहीत्यादिपदानां किं कुर्वतां गौः कार्ये (क्रय्ये) त्येकवाक्यत्वमिति विमृशन्ति। विमश्यचैवमवधारयन्ति--इमानि पदानि प्राशस्त्यं जनयितुं समर्थानि। तच्च गोकार्य संबन्धाप (न्धाव) गताप (ताव) पेक्षितमिति तद्वारेणैषामेकवाक्यत्वम्, प्रकारान्तरेणासम्भवादिति। एवं पूर्वपूर्वपुरुषाणामपि पूर्वपूर्वसार्थवादवाक्यव्यवहारदर्शनात्, असंभवप्रमेयान्वयस्वार्थानां स्तावकतयैकवाक्यत्वव्युत्पत्तिरवगन्तव्या। ननु विभागे साकाङ्क्षत्वाभावादेकवाक्यत्वमेव न संभवति। उच्यते--अर्थवादपदानि साकाङ्क्षाणि, कार्यपरतया सर्वेषां पदानां व्युत्पत्तेः। विध्युद्देशविभागे कार्यपरतामलभमानानि साकाङ्क्षाणि भवन्ति। तदाकाङ्क्षया विध्युद्देशपदानामपि तज्जन्ययोग्यतास्मरणापेक्षबोधजनकत्वकल्पनायां तद्विभागे साकाङ्क्षत्वं परिकल्प्यते। एतच्च कल्पिताकाङ्क्षावशेनाप्येकवाक्यत्वं लोके व्युत्पन्नम्, 'रक्तः पटो भवति' इत्यादिषु। तत्रापि हि गुणपदश्रवणे सति द्रव्यपदं गुणान्विताभिधायिस्वभावमिति परिकल्प्य गुणपद विभागे साकाङ्क्षत्वं परिकल्प्यते। तस्मादाकाङ्क्षाशून्यत्वादेकवाक्यत्वाभावो वक्तुं न शक्यते। नन्वर्थवादपदानि किमन्योन्यसंसर्गं बोधयन्ति प्राशस्त्यं प्रतिपादयन्ति नेति (नवेति) विकल्पे कः परिहारः? अबोधयन्तीति। पदा... (दानां) अबोधयतां कथं प्राशस्त्यप्रतिपादकत्वम्? अर्थवादपदप्रतिपन्नाः पदार्थाः स्वसंवन्धिनीमन्योन्यसंसर्गयोग्यतावस्थां स्मारयन्ति। सा च स्मारिता प्राशस्त्यं; तदपि साधनत्वयोग्यतामित्यनेन क्रमेण योग्यतास्मारकत्वं वेदितव्यम्। नन्वर्थवादपदैः संसर्गप्रतीतिर्जातेव कथं प्रतिभाति, यदा न जाता? उच्यते—पदार्थेष्वन्योन्यान्वयार्हरूपतयावगतेषु विवेकाग्रहात् संसर्गप्रतीतिर्जातेव प्रतिभाति, अनाप्तोक्तनदीतीरादिष्विवेत्यदोषः[2]। [3]अत एवार्थवादपदानां पदैकवाक्यत्वं न वाक्यैकवाक्यत्व,

---

१. प्रयोज्यवृद्धप्रवृत्युपलम्भात–सस्तुतिकंप्रयोजक वृद्धवाक्यं श्रुतवतःप्रयोज्यवृद्धस्य प्रधानभूते कार्ये एव प्रवृत्तिरुदेति–न स्तुतिश्रवणेनार्थान्तरे ॥

२. "नद्यास्तीरे फलानि सन्ति" इत्यनाप्तेनोच्यमानं वाक्यं शृण्वन्तोऽपिनदीतीरफलानां सत्वं प्रतिपद्यन्ते तत्कस्य हेतो[2]: । फलानां तत्रासम्बन्धाग्रहात्। तद्वदर्थवादेष्वपि तदग्रहात् संसर्गप्रतीतिर्जातेव भातीति दृष्टान्तार्थः ॥

३. अत एवार्थवादानां पदैकवाक्यत्वं-इदंचप्राभाकरमते। भाट्टमतेतु अर्थवादपदानि विशिष्टं वाक्यार्थं कथादि मात्रारूपं प्रतिपादयन्ति। तत्रानुपपत्या तात्पर्यादिवशेनच सर्वमपि वाक्यं लक्षणया प्राशस्त्यमेकमर्थं प्रतिपादयति एकप्राशस्त्यरूपार्थस्य प्रकाशनात् पदस्थानीयत्वेन पदं सदेकवाक्यमितिस्वीक्रियते ॥

मित्यवगन्तव्यम्।[1] यत एव परम्परया कार्यसाधनत्वबोधोपयोगिप्राशस्त्योपस्थापकत्वमर्थवाद-पदानाम्, अत एव (न) लाक्षणिकत्वम्। नापि गौणत्वम्। यत्र हि मुख्यार्थोपस्थितमर्थान्तरं कार्यान्वयि, तत्र गौणत्वं लाक्षणिकत्वं वा। इह तु अर्थवादपदोपस्थापितमपि प्राशस्त्यबोध-हेतुत्वात् प्रमाणतयैवावतिष्ठत इति प्रमाणवृत्तिरियं चतुर्थवृत्तिः सर्ववृत्तिजघन्यैवेत्यवगन्तव्यम्।

प्राशस्त्यबोधकत्वं च तदनुगुणप्रमाणान्तरप्रतिपन्नपदार्थोपस्थापकतया, नान्यथेति यस्य यस्य पदस्य येन येन प्रकारेण प्राशस्त्यबोधानुगुणप्रमाणान्तरप्रतिपन्नपदार्थरूपत्वं संभवति तस्य तस्य तेन तेन प्रकारेण गौण्या लाक्षणिक्या मुख्यया वा वृत्या तत्तत्पदार्थोपस्थापकत्वं वेदितव्य-मित्यनवद्यम्॥

(मन्त्रलिङ्गाधिकरणम्)

मन्त्राणां[2] ग्राहकग्रहणं संभवति नवेति विचार्यते। नेति पूर्वपक्षवादी मन्यते। तथाहि—ग्राहकग्रहणं हि नाम अकार्यभूतपदार्थसाध्यतया स्वशब्देन कार्यभूतपदार्थप्रतिपादनम्। तच्चेह न संभवति। तथाहि—इह तावत् कार्यभूतापूर्वप्रतिपादकं यल्लिङ्पदं न तत् मन्त्रान्वितनियोगं प्रतिपादयति, मन्त्रस्य लिङ्पदैकवाक्यभूतेन केनचित् पदेनानुपस्थापितत्वात्। नन्वन्विताभिधाने प्रतियोगिसन्निधिमात्रमपेक्षितम्, न पदसन्निधिः। न मन्त्रा (मन्त्राश्च) न प्रत्यक्षधीसन्निहिता इति किमित्यन्विताभिधानं न संभवति। उच्यते—यदि नियोज्यान्विताभिधायित्ववत् मन्त्रान्विता-भिधायित्वमपि लिङो, व्युत्पन्नं स्यात्, तदानीं लिङोप्यभिधानपर्यवसाने सति येन केनचित् प्रकारेण सन्निहितमन्त्रेणाप्यन्विताभिधानं स्यात्। नचैवं व्युत्पत्तिरस्ति। ननु (ननू) भयविधेतिकर्तव्यतान्वितनियोगान्विताभिधायितया लिङो व्युत्पत्तिरस्ति, [3]मन्त्रश्च संन्निपाति-कोटिपतित इति तं विनापि लिङोभिधानापर्यवसानादाकाङ्क्षास्ति। नेतिब्रूमः। वाक्यान्तर-समर्पितेतिकर्तव्यतया अन्विताभिधानसिद्धेः। ननु मन्त्राणामप्येकवाक्यत्वाविशेषात् वाक्यान्तर-समर्पितैरिव मन्त्रेणापि किमित्य (मित्यन्विता) भिधानं न सम्भवति? तदयुक्तम्। यत्पदं येन पदेनैकवाक्यं तत्तदव (दुप) स्थापितार्थान्वितं स्वार्थमभिधत्ते, न तेन पदेन; अन्यथा समिदादिवाक्यमप्यन्विताभिधानं स्यात्। किञ्च मन्त्रान्वितनियोगाभिधाने लिङ्शब्दस्य मन्त्रैक-वाक्यत्वमपि न स्यात्। अकार्यपदं हि स्वव्यतिरिक्तं कार्यान्वयिनमर्थमुपस्थापयत् कार्य-पदेनैकवाक्यतां प्रतिपद्यते, यस्य स्वार्थान्वयसंभवः। यस्य तु स्वरूपमेव वाक्यार्थेऽन्वेतुं योग्यं न स्वार्थः, तत्पदं स्वरूपान्वयपरतया कार्यपदेनैक वाक्यतां याति। यथा

---

१. यत एव—अर्थवादवाक्यानि परंपरया कार्यसाधनत्वबोधोपयोगिनमर्थं प्रतिपादयन्ति। इदं सर्वं—प्राभाकर मतानुयायिभिः ग्रन्थकर्तृभिः उल्लिखितः॥

२. ग्राहकग्रहणं—पारिभाषिकोयं शब्दः। अत एव अस्य विवरणमपि निर्वचनरूपं ग्रंथ एव कृतमुपलभामहे। यत्र विधौ सर्वेषां प्रवेशः, तेन विधिनान्वयः—तदेव विधिःगृह्णीयात् यस्य पदस्यार्थः स्वार्थस्य साधनं भवितुमर्हति—तादृशा मन्त्रा न वेति विचारः॥

३. मन्त्रश्च संन्निपतिकोटी—संप्रदानत्वेनकर्माङ्गदेवतादिस्मारकत्वेन मन्त्रस्य सन्निपत्योपकारकरूपमङ्गत्वं—अतश्च सः कर्मणः स्वरूपेण संबद्धः। तं विना विधेः निराकांक्षता न भवेदिति भावः।

''गामित्युच्चारये''ति । इह तु मन्त्रपदस्य स्वार्थभूतनिर्वापादेरेवान्वयसंभवात् न स्वरूपान्वयपरतयैकवाक्यत्वं युक्तम्।

नन्वत्रापि कार्यसाधनीभूतनिर्वापाद्युपस्थापकयैवैकवाक्यत्वमिष्यते । तच्चोपस्थापकत्वं प्रयोगवेलायाम्, न विधिवेलायामित्येतावानत्र विशेषः। एवं तर्हि स्वार्थान्वयपरत्वेनैकवाक्यत्वे स्वरूपान्वयपरता न स्यात् । अथ स्वरूपान्वयपरत्वमन्तरेण ग्राहकग्रहणासंभवात् लिङ्गविनियोज्यमन्त्राणां विहितसाधनविशेषप्रकाशने विनियोगाभावात् प्रयोगवेलायां तत्प्रकाशकत्वं न स्यात् इतिचेत् ? मैवम्; नावश्यं प्रयोगकाल एवापूर्वीयसाधनविशेषं प्रतिपाद्यम्, अविधिवेलायामपि तत्संभवात्। ननु विधिवेलायां विधानसमर्थस्यैवापूर्वसाधनप्रतिपादकत्वम्। मन्त्राश्च विधातुं न शक्नुवन्ति, केषांचिद्यद्वृत्तोत्तमपुरुषादि[1] वि(इ)हतविधिशक्तिकत्वात्, केषांचित् देवताश्रवणशून्ययागार्हहोममात्रप्रतिपादकत्वात्। तन्न। देवाताश्रवणाभावेप्यव्यक्तन्यायेन सौमिकविध्यन्तादि(न्ताति)देशाद्देवता लभ्यते। यवृत्तादियोगेऽपि तदविवक्षया विधायकत्वं घटते " यदाग्नेयः " इतिवत्। [2]केचिन्मन्त्रानुकरणात्मकं वाक्यं स्वाध्यायकाले विधीयते; तदवस्थापितंच मन्त्रवाक्यमवघातादिवत् ग्राहकेण गृह्यते; गृहीत्वा च विनियुज्यते; विनियुक्तश्च प्रयोगकालेऽनुष्ठेयमर्थं प्रकाशयतीति । तदयुक्तम्; अनुकार्यानुकरणविभागस्य प्रमाणशून्यतया मीमांसकैः परित्यक्तत्वात् । न हि कश्चित् (क्वचि) द्विभागवाक्यमात्मस्वरुपसभागवाक्यप्रतिपादकतया लोके व्युत्पन्नम्। "गामानयेत्युच्चारये"त्यत्र व्युत्पन्नमितिचेन्न। तत्रापि सभागमेव वाक्यमुच्चारितम्। तस्य च वाक्यार्थभूतोच्चारस्यान्वयानुपपत्त्या स्वार्थस्य स्वरुपान्वयपरतयैकवाक्यत्वसंभवेनाखण्डस्यात्मस्वरूपवाक्यान्वयाभिधान (नशक्ति): क्ति कल्पयितुं युज्यते। ननु प्रत्यक्षेण स्वरूपसन्निधिः? न स्वरूपेण; अतश्च वाक्यार्थान्वय्युपस्थापनेन हेतुत्वाभावात् कथं तस्यैकवाक्यत्वम् ?

उच्यते—प्रत्यक्षसन्निधौ विषयोऽपि हेतुरिति स्वरूपमपि स्वसन्निधौ कारणमित्यदोषम् (दोषः)। किञ्च प्रयोगकाले अर्थप्रकाशकत्वे मन्त्रस्याभ्युपगम्यमाने स्वाध्यायकाले मन्त्रोच्चारणमर्थावबोधानुपयोगि स्यात्, प्रयोगकालवर्त्युच्चारणादेवार्थावबोधसिद्धेः। ततश्च स्वध्यायविहित मन्त्रभागविषयमध्ययनमविवक्षितार्थं स्यादिति प्रथमसूत्रोक्तविरोधं (धः); ये तु वचनविनियोज्या मन्त्राः तेषामस्तु नाम कथं चिद्ग्राहकग्रहणम्। ये तु केवललिङ्गविनियोज्या मन्त्राः, तेषां न प्रकरणे समाम्नानमन्त्रात् (नमात्रात्) ग्राहकग्रहणं संभवतीति पूर्वः पक्षः।

राद्धान्तस्तु—मन्त्राणांसन्निहितयोग्यत्वात् तदन्विताभिधायित्वं विना लिङ्शब्दस्य साकाभत्वात् मन्त्रान्वितं विनियोगं लिङ्शब्दः प्रतिपादयति। ननु मन्त्रान्विताभिधानं विना कथं लिङ्स्साकांअत्वम्। स्वसन्निधिसमाम्नातमन्त्रवाक्ययुक्तस्य लिङो मन्त्रान्विताभिधायिस्वभावत्वकल्पनात्। तदपि कुत इति चेत्; उच्यते—इह तावन्मन्त्राणां साधिकारलिङ्सन्निधिसमाम्नातानां तद्विभागे स्वतः कार्य-

---

१. उत्तमपुरुषादि–अत्र आदिपदेन आमन्त्रणादीनां संग्रहः॥

२. केचित्–मीमांसकैः परित्यक्तत्वात्—अयं विषयः ग्रन्थान्तरसाहाय्यमन्तर अशक्यप्रतिपादनः। शास्त्र दीपिकादयो द्रष्टव्याः॥

परत्वासंभवात् साकाङ्क्षत्वमिति तदेकवाक्यत्वमवगम्यते । तद्वशाच्च मन्त्रपदविभागे लिङोऽपि साकाङ्क्षत्वं कल्पनीयम् । तद्विभागे च साकाङ्क्षत्वं, तदन्विताभिधायिस्वभावत्वकल्पनया तदवस्थापितार्थान्विताभिधायिस्वभावत्वकल्पनया वा ? । तत्र तदवस्थापितार्थान्विताभिधायित्वकल्पनं मन्त्रेषु विधेयार्थेषूपपद्यते, न विहितार्थेषु । तत्र हि पूर्वमेव मन्त्रप्रतिपाद्यस्य विधिसाधनतयावगतत्वात् तदन्विताभिधायित्वकल्पनं लिङस्स्वतः प्राप्तमिति (विधि) परत्वविरोधि स्यात् । मन्त्राणां च (यत्) न विधायकत्वं संभवति (तीति) । तदयुक्तम्; विधिपरत्वानिश्चये यद्वृत्ताद्यविवक्षायां कारणाभावात् । ननु विध्येकवाक्यत्वं (त्वात्) विधिपरत्वं निश्चियते, तन्न; प्रयोगकाले विहितार्थप्रकाशकतया विध्येकवाक्यत्वोपपत्तेः । येषु विधिपरत्वं निश्चितं यागाथमन्त्रेषु तेषु देवताश्रवणाभावात् विधायकत्वं न निर्वहति । ननु अव्यक्तन्यायेन देवता भविष्यति । तदयुक्तम् । मत्राणां तेषामधिकारविध्येकवाक्यतया तदङ्गभूतयागादिविधायकत्वमङ्गीकरणीयम् ।

अङ्गेषु चाकाङ्क्षोर्था (त्था) पकलिङ्गदर्शनशून्येष्वितिकर्तव्यताकाङ्क्षाभावादतिदेशासंभवम् (वः) । तस्मात् तेऽपि न विधायका इति विहितमपूर्वायसाधनविशेषं प्रतिपादयतां मन्त्राणामेकवाक्यत्वमङ्गीकरणीयम् । अङ्गेषुचाकाङ्क्षोर्था (त्था) पकतया विधै (ध्यै) कवाक्यत्वं च लिङ्पदस्य मन्त्रान्विताभिधायिस्वभावत्वकल्पनेन तद्विभागे साकाङ्क्षत्वकल्पनमुपपद्यते, नान्यथा । तथाहि––आकाङ्क्षयां सत्यां मन्त्रेण प्रत्यक्षसन्निहितेनान्वितमधिकारापूर्वमवगम्यते । तद्ग्रहीतुश्च केन द्वारेणोपकुर्यादित्यपेक्षायां तदीयसाधनप्रकाशसमर्थतया तद्द्वारेण साधनविशेषशेषतया विनियुज्यते। तथा विनियुक्तं चरिततात्पर्यत्वात्प्रयोगकाले साधनीभूतं स्वार्थं प्रतिपादयति। तत्प्रकाशनं च विधेरपेक्षितमिति विध्येकप्रयोजनत्वात् तदन्वय्यर्थप्रतिपादकत्वाच्च विधिपदेनैकवाक्यत्वं मन्त्राणामुपपद्यते । इतरथातु श्रोत (श्रौत) स्वरूपपरत्वं स्यात्, न साधनावस्थस्वार्थपरत्वम्, तत्परत्वे प्रमाणाभावात्। निर्वापादिस्वरूपं च लोकवेदसाधारणमिति तत्प्रकाशयतां कार्यान्वय्यर्थप्रकाशकत्वाभावात् कार्यपदेनैकवाक्यत्वं न स्यात्। ननु स्वरूपमपि यदपूर्वीयं तस्य सन्निहितत्वात् तत्रैव निर्वापादिपदवृत्तेरर्वापूयनिर्वापादिस्वरूपप्रकाशकतया तत्पदेनैक वाक्यत्वमवकल्पते। तन्न। नित्यवदेकवाक्यत्वमस्मिन् पक्षे नावकल्पते।

स्वरूपार्थत्वेहृचने (न्ये) नाप्युपायेन स्वरूपस्य प्रकाशयितुं शक्यत्वात्। ननु साधनविशेषोप्यनेनोपायेन प्रकाशयितुं शक्य इति तत्रापि न नित्यवदेकवाक्यत्वं घटते। उच्यते—तस्मिन् पक्षे नित्यवदपूर्वगृहीतत्वात् तदर्थतया नित्यमनुष्ठेयमिति तदुपपत्तये नियमादृष्टानुविद्धम पूर्वीयसाधनविशेषप्रकाशन (नं) द्वारतया परिकल्प्यत इति नोपायान्तरावकाश: । अत एव च पूर्वमन्त्रप्रयोगान्मन्त्रप्रकाश्यार्थस्मृतावप्यदृष्टानुविद्धस्मुतिसिद्धये मन्त्रप्रयोग उपपन्न: । ननु स्वाध्यायकाले मन्त्रोच्चारणमर्थावबोधानुपयोगि स्यादित्युक्तम् । नेति वदाम: । स्वाध्यायकालीनस्य प्रयोगकाले मन्त्रप्रयोगसौकर्यापादकत्वात्। पूर्वमेव हि शिक्षितं मन्त्रवाक्यं प्रयोगकाले वक्तुं सुशकम्। नन्वेवं सति प्रयोगकाले किमिति मन्त्रोच्चारणम्? किमिति ब्राह्मणवाक्यवत् स्वाध्यायकाले गृहीतमेव वृत्या (स्मृत्या) रुढतया नार्थं प्रतिपादयति ? मैवम्। 'तिष्ठन्याज्यामन्वाह' इत्येवमादिषु प्राप्तमुच्चारणं कृत्वा तत्र गुणविधानाप्रयोगदर्शनात् प्रयोगकालवर्त्युच्चारणो-

पक्कतानामेव विहितार्थप्रकाशकत्वमित्यवगम्यते। ननु स्वाध्यायकालाधीतस्य मन्त्रस्य स्वरूपान्वय परतया किमित्येकवाक्यत्वं नाश्रीयते? किमिति प्रयोगकालवर्त्युच्चारणसौकर्यापादकतया तत्कार्य भूतविहितार्थप्रकाशनद्वारेणैकवाक्यत्वमाश्रीयते?

अत्र ब्रूमः—एकपरतयैकवाक्यत्वोपपत्तौ न द्विपरत्वमाश्रयितुं शक्यते। ये तु मन्त्राः विहितार्थप्रकाशकतया नोपकुर्वन्ति ते स्वाध्यायकाला...(धी) ताः स्वरूपान्वयपरतयैकवाक्यभूता इत्यवगन्तव्यम्; [1]यथा जपस्तोत्रशस्त्रमन्त्राः । ननु तेषां प्रतीकलिङ्गादिभिः वचनविनियोज्यत्वात् वचनसमर्पिततयैव ग्राहकग्रहणं सिध्यति। उच्यते—यदि स्वाध्यायकाले केनचित् क्रमेण मन्त्रा नाधीयेरन् प्रतीकादिभिरुपादानं न स्यात्। अनुपात्तानां च विनियोगो न स्यादिति स्वरूपान्वयपरत्वं तेषामिति सर्वं समञ्जसम्॥

(स्मृत्यधिकरणम्)

[2]यान्यपूर्वकार्यपराण्याप्तप्रणीतान्यष्टकादिवाक्यानि तानि वेदमूलानि नवेति विचारः न वेदमूलानीति पूर्वपक्षवादी मन्यते। तथाहि—न तावत् प्रत्यक्षं वेदवाक्यं मूलम्, अष्टकादिकार्यप्रतिपादनशक्तस्य वेदवाक्यस्यास्मदादिभिः कदाचिदप्यप्रत्यक्षीकृतत्वात्। यानि तु प्रत्यक्षीकृतानि वेदवाक्यानि न तेषु तादशं वाक्यमुपलभामहे। नानाशाखासु विप्रकीर्णत्वादनुपलब्धिरितिचेन्न। न हि विप्रकीर्णत्वमनुपलब्धिकारणम्। नहि विप्रकीर्णा घटादयो नोपलभ्यन्ते। यदि च विप्रकीर्णत्वमनुपलब्धिकारणं स्यात् तदा सर्वोरप्यनुपलब्धत्वादप्रत्यक्षत्वमेव वाचोयुक्त्यन्तरेणोक्तं स्यात्।

तेन प्रयोगविधिमन्त्रार्थमूलतापि निराकृता ज्ञेया। ननु स्मर्तृपुरुषप्रत्यक्षाणि तानि वेदवाक्यानि; तावतैव च प्रत्यक्षवेदमूलसिद्धि (द्धिः)। अस्मदप्रत्यक्षता तु तत्कालवर्तिपुरुषैरर्वाचीनानां संप्रदायस्याप्रवर्तितत्वात्। अस्मत्पूर्वपुरुषैरप्यस्मान् प्रति वेदस्याप्रोक्तत्वादितिचेत्, तन्न। या हि शाखा तावदधीतपूर्वा सा तावदहरहरभ्यासजनितसंस्कारपाटवयुक्तानन्ताध्येतृपुरूषवर्तिस्वभावतया पूर्वपूर्वपुरुषैरुत्तरोत्तरपुरुषाणामविच्छेदेन प्रोच्यमाना दृष्टा। स्मृतिमूलशाखा यद्यधीतपूर्वा दृष्टा स्यात् साप्यस्मान् प्रति कैश्चित्प्रोच्येतेति विषयनियतमिदं कारणं विषये सति यदवश्यंभाविकारणं तद्व्यतिरिक्तकारणसाकल्ये सत्यनुपलभ्यमानत्वान्नास्तीत्यवगच्छामः। यदि चाधीतपूर्वशाखाया एवंस्वभावत्वं नाभ्युपगम्यते तदानीं ज्योतिष्टोमाद्येकवाक्यभूतपदवाक्यान्तरे योग्यानुपलब्ध्यभावात् तेषामबोधकत्वं स्यात्। किं च स्मर्तृप्रत्यक्षत्वे स्मृतिप्रणयनानुपपत्तिः नच भावित्यागनिश्चयेन स्मृतिप्रणयनं, नच कस्यांचिच्छाखायां त्यागो भवतीति निश्चेतुं शक्यते तस्मान्न प्रत्यक्षवेदमूलता। अस्तु तर्हि परोक्षवेदमूलता, तदयुक्तम्, तत्सद्भावे प्रमाणाभावात्। ननु स्मृतिवाक्याद्विशिष्टापूर्वकार्यविषयाधी (धीः जा) ता; सा च पौरुषेयवाक्यजनिता परम्परया वेदकारणिका दृष्टेति वेदमनुमापयति।

---

१. यथा जपस्तोत्रशस्त्रमन्त्राः – जपमन्त्राणां प्रायो निरर्थकशब्दरूपत्वेन, स्तोत्रशस्त्राणां सार्थकत्वेपि स्तुतिशस्त्राधिकरणे तयोरारादुपकारकत्वस्य स्थापितत्वच्चैवमुक्तिः॥

२. यान्यपूर्वेति–दृष्टसुखार्थानां वेदमूलनैयत्याभावादेवमुक्तिः॥

तदयुक्तम्, बुद्धेरेवानुत्पत्तेः। मूलप्रमाणानु(नुमान)पूर्वकमर्थे निश्चिते पुंवाक्यात् ज्ञानोत्पत्तिः। इहच मूलमनुमातुं न शक्यते, कारणशून्यतया मूलानुमानाभावस्य निश्चितत्वात्। नह्यपूर्वकार्यविषयं ज्ञानं प्रत्यक्षादिकारणकं संभवति, तेषां तत्राशक्तेः। नापि वेदकारणकम्, तस्य योग्यानुपलम्भनिरस्तत्वात्। ननु स्मृतिकारस्यापि पूर्वस्मृत्यनुमितौ वेदो मूलप्रमाणतया संभवति, तत्पूर्वस्मर्तुरपि तथा––इत्यनादिस्मृतिपरंपरानुमितनित्यपरोक्षवेदस्य मूलतया संभावितत्वात् कथं कारणशून्यतया (प्र) मित्यभावनिश्चयः? मैवम्। पदतत्क्रमसन्देहस्य गतिविग्रहं स्मृतेरनुमितं वाक्यमर्थं न प्रतिपादयेत्। तादृशस्य वेदवाक्यस्य प्रमितिहेतुत्वं न संभवति। यद्धि निर्णीतनियतरूपपदतत्क्रमकं वाक्यं तद्धि बोधकम्; नच परोक्षवेदस्य तादृशत्वम्, तस्मान्न नित्यपरोक्षस्य वेदस्य प्रमितिकारणत्वं संभवति। किञ्च पुंवाक्ये वक्तुः प्रमितिकारणतया यदनुमितं न तत् श्रोतुं(:)प्रमितिकारणम्। न हि वक्त्र (क्तृ) ज्ञानकारणादिन्द्रियादेः श्रोतुं (:) प्रमितिरुत्पद्यमाना दृष्टा। अतोऽपि नानुमितिकरणत्वं स्मर्तृज्ञानस्य। किं च स्मृतिकारस्यापि पूर्वस्मृतितो बुद्धिरुत्पन्ना परंपरया कारणभूतवेदमनुमापयति। बुद्ध्युत्पत्तित्व (ध्युत्पत्या) स्मृतिवाक्यान्वितमनुमाय ततोप्यर्थशङ्कां निरास(रस्य) तीति पूर्वमेव निश्चितत्वादर्थस्य पश्चादनुमीयमानो वेदो न तत्र प्रमाणं संभवति, अनुवादरूपत्वात्।

यदि स्मृतिवाक्यान्वितमनुमाय तदानीमेव तत्कारणतयाऽनुमितवेदात् प्रमितिमुक्त्वाद्यशंकागिरः संयत (ति)रित्युच्यते,। तथासतिस्मृतिवाक्यजनितबुद्ध्या वेदोऽनुमीयतइति परित्यक्तं स्यात्। अथ माभूत् स्मृतिजनितबुद्ध्या वेदाऽनुमानम्। स्मृतित एवापूर्वकार्यविषयायामाप्तप्रणीततया तद्योग्यवेदात्मकमूलप्रमाणमनुमीयतामित्युच्येत तथापि नित्यपरोक्षस्य प्रमितिहेतुत्वासंभवात्। [2]किञ्चातिव्याप्तिरपि तथासति स्यात्, चैत्यवन्दनवाक्यादपि वेदानुमानप्रसंगात्। अथ तेषामनाप्ततेच्युच्येत तदयुक्तम्॥

"योऽसौ बुद्धं (द्धो) मुनिं (निः)कामं करुणाविष्टमानसम् (:)। संसारदुःखहानायमोक्षशास्त्रं प्रणीतवान्। निरस्ताशयदोषोऽसौ प्रमादभ्रान्तिवर्जितम् (:)। वनिष्ठकारणग्राम आप्तानामग्रणीर्मतः। मध्यस्थमतयः कोवा (केवा) मन्वादि (दे) रपि...(तत्) स्मृतेः। चैत्यवन्दनवाक्यस्य वैषम्यं वक्तुमीशते॥"

अथ तेषामपूर्वविषयत्वं नास्तीति यद्युच्येत अष्टकादिवाक्येष्वपि समानम्। यदितेषां लिङ्गयुक्तत्वादपूर्वपरत्वं तच्चैत्यवन्दनादिष्वपि समानम्। अथ तत्र पश्याम्यहमिति वाक्यात् योगिप्रत्यक्षमूलता बुद्धादिवाक्यानामवगतेति न वेदानुमेत्युच्येत, तदयुक्तम्। योगिप्रत्यक्षाख्यस्य प्रमाणस्य[1] प्रमाणबाधिक[त]त्वात् मूलज्ञानशून्यतया न तद्वाक्यं प्रमाणमिति वेदानुमानविरोधः। तस्मान्नाष्टकादिस्मृतीनां वेदमूलता। नापि पूर्वपूर्वस्मृतिमूलता; अन्धपरंपरापत्तेः। तथा सति

---

१ अलौकिकप्रत्यक्षस्याभ्युपगमे प्रमाणाभावादनुमानादिविलोपरूपातिप्रसङ्गाच्च योगिप्रत्यक्षं न प्रामाणिकं पन्थानमुपरोद्धुमर्हतीति भावः॥

२. किञ्चातिव्याप्तिरपि–स्मृतिवाक्यानां प्रत्यक्षवेदवाक्यमिव परोक्षवेदवाक्यमपि न मूलं भवितुमर्हतीति निरुपयन्नतिव्याप्त्यापि तन्नसंभावनामर्हतीत्याह — बौद्धादिस्मृतेर्मन्वादि स्मृतीनां वैलक्षण्यस्य वक्तुमशक्यत्वेन यदि वेदमूलत्वानुमानं मन्वादिस्मृतीनामिष्यते तर्हि तदन्यासामर्थ्यविशिष्टं मन्वादिस्मृतीनामेव वेदमूलता न वक्तुं शक्यते इत्यभिप्रायः॥

रात्रिदेवत्यकर्मकार्यविषयकार्य [र्थं] प्रतिपादकस्य वेदस्याभावात्' यांजनादिर्मन्त्रोऽपूर्वीयरात्रि-देवताप्रकाशकस्सन्नप्रमाणतया मानान्तरापेक्षार्थस्स्यात्। यदा वा पौरुषेयमपि वाक्यं सापेक्षं तदा शब्दस्य स्वाभाविकमेव सापेक्षत्वमिति कृत्स्नस्य वेदस्य सापेक्षतयाऽप्रामाण्यम्। किमिदमप्रामाण्यम्? किञ्च सापेक्षत्वम्? कथं वा तदप्रामाण्यकारणमिति? उच्यते। प्रमित्यनुत्पादकत्वमप्रामाण्यम्। स्वप्रतिपाद्येऽर्थे मानान्तरापेक्षतया बोधजनकत्वं सापेक्षत्वम्। यच्च सापेक्षत्वं तदप्रामाण्य नयमितमिति अप्रमाणप्रकारभूतं सापेक्षत्वं अप्रामाण्यस्य लक्षणमिति ज्ञापकहेतुसापेक्षत्वमप्रामाण्यस्य।

ननु यत्र निमित्तनिश्चयादिकारणवैकल्यमप्रामाण्यमापद्यते तत्र कथं सापेक्षतयाऽप्रामाण्यम्। इत्थं, वाक्यस्य ह्यप्रामाण्यं सापेक्षत्वप्रकारमेव दृष्टमित्यन्तर्भावितत्प्रकारकमेवाप्रामाण्यं यतःकुतश्चिद्धेतोरापद्यमानमापद्यते। ननु सापेक्षत्वेऽपि वैकल्पिकशास्त्राणां चा [प्रा]प्रामाण्यं ष्टं वाचिकं (पाक्षिकं) तन्न नित्यं, नित्यवच्चाप्रामाण्यं वाक्यस्य सापेक्षत्वनियतम्। ननु पौरुषेयतयापि तन्नियतम्। सत्यम्। अत एव पौरुषेयत्वमन्तर्भाव्याप्रामाण्यमापद्यते। तत्तु क्वचिदप्रामाण्या [म] नुषङ्गादापतति। अग्निसिद्धावुष्णत्वादिवत्। क्वचित् स्वतएव यत्र वाक्यत्वादिहेतुभिः साध्यते तत्र पौरुषेयतयैव क्वचिदप्रामाण्यसाधनम्। क्वचिदप्रामाण्ये साधिते सति पौरुषेयत्वमनुषङ्गाद्यदापद्यत इति तत्र विवेक्तव्यम्। ननु पौरुषेयत्वं पूर्वमेव निराकृतं। सत्यम्। वाक्यत्वादिहेतुकं पौरुषेयत्वं निराकृतम्। अप्रामाण्यमनुषंगा [द्य] दापतति, तस्य तन्निराकरणेनैव निराकरणमित्यवगन्तव्यम्। ननु याञ्जना इति सामान्यसम्बन्धाभावात् नाष्टकादेवताभूतरात्रिप्रकाशनेऽपि नियोग इति कथं स्मृतेः वेदमूलत्वे मन्त्रस्य सापेक्षता। मैवम्। माभूद्विनियोगः। मन्त्रस्तावत् कार्यपरत्वानुरोधात् देवताभूतरात्रिप्रकाशनार्हः। तच्च स्मृतेरवेदमूलत्वे न शक्नोति कर्तुमित्येतावन्मात्रमत्रोच्यते। तस्मान्नास्मिन्नधिकरणे लिङ्गविनियोगापेक्षेति नातीव तत्प्रसाधने यतितव्यम्। तस्मादप्रमाणं चोदनेति पूर्वः पक्षः।

राद्धान्तस्तु—अष्टकादिस्मृतीनां वेदमूलता। तथाहि—इह तावदष्टकादिस्मृति [ती] रपूर्वकार्यपरा आप्तप्रणीता उपलस्व [ब्ध] वतामिमास्मृतयो मानान्त [?] [र] कापूर्वता [का] आप्तप्रणीतत्वात् संप्रतिपन्नवाक्यवदित्यनुमा [न] पूर्वकमर्थे निश्चिते शङ्कानिरासे सति अष्टकाद्यपूर्वविषया बुद्धिरुत्पद्यते तावत्। पश्चात् स्मृतिमूलमानानुगुणकारणवेदस्य प्रत्यक्षानुपलब्धत्वात् कारणशून्यतयानुमानबाधपूर्वकं वाक्यज्ञानस्यापि बाधप्रसङ्गे सति पुनरेवमनुमानबुद्धिरुत्पद्यते। इमास्तावदष्टकादिस्मृतयः वेदप्रमापूर्वकाः अनादिकालप्रवाहायातनिर्विचिकित्सशिष्टानुष्ठीयमानार्थत्वे सत्यपूर्वकार्यपरपौरुषेयवाक्यत्वात् सूत्रकारादिवाक्यवदिति। ननु योग्यानुपलम्भनिरस्तत्वान्न प्रत्यक्षवेदो मूलत [ता] या संभवतीत्युक्तम्। माभत् प्रत्यक्षो वेदो मूलम्। परोक्ष एव तु वेदो मूलं भविष्यति। ननु स्मृतिकारस्य परोक्षसद्भावे किं प्रमाणम्। पूर्वस्मृतिलिङ्गजानुमानम्। तत्कर्तुरपि तथा। आद्यस्मृतिकारस्य कथं वेदावगतिरितिचेत्; नास्त्याद्या

१. याञ्जना इतिमन्त्रस्य लिङ्गविधया विनियोजकवाक्यकल्पनमित्ययमर्थः कुतो नात्र प्रतिपाद्यत इत्याशंक्य तस्य तृतीयाध्याये करिष्यमाणत्वेन नात्र स विचारः प्राप्तकाल इति पूर्वपक्षिण आशयः॥

स्मृतिः, अनादित्वात् स्मृतिपरम्परायाः। ननु स्मृतिपरम्परानादित्वं कथमवगम्यते। अनुमानात पूर्वपूर्वस्मृतिकाराः पूर्वपूर्वस्मृतिलिङ्गवशेन अष्टकादिश्रुतिमुपलब्धवन्तः अष्टकादिस्मृत्यवगतिमत्पुरुषत्वात् अस्मद्वदिति। [1]नन्वेवंसत्यन्धपरंपरा स्यात् [न] पूर्वपूर्वपुरुषवाक्यादेवाष्टकादिस्मृत्य वगतया[त्या] तु तेषां प्रमाणतेष्यते। यत्र हि वाक्यत एव पूर्वपूर्वपुरुषवाक्यानां प्रमाणतेष्यते [न]तत्रान्धपरम्परा। नन्वेवमपि किमित्यन्धपरंपरा [न] वाक्यपरम्परानादित्वादेव प्रामाण्यसिद्धेः। उच्यते। अनन्तरपुरुषस्य द्वित्रिचतुरपुरुषान्तरितस्य वा यत्र वाक्ये पुरुषस्य वाक्यव्यतिरिक्त प्रमाणपरिच्छिन्नत्वं निश्चितं तत्र शङ्कानिरासात् तद्वाक्यस्य बोधकत्वं दृष्टम्। तस्मात् पुरुषवाक्यपरम्परानादितायामपि शङ्कानिरासहेतुभूतप्रमाणान्तरपरिच्छिन्नत्वावधारणाभावात् न वाक्यस्य बोधकत्वम्। श्रुत्यनुमानेऽपि समानमितिचैन्मैवम्। न हि श्रुत्यनुमाने पुरः [ष] वाक्यस्य व्यापारः किंतु लिङ्गतया। न च लिङ्गं स्वव्यतिरिक्तप्रमाणपरिच्छिन्नत्वावधारणाधीनं शङ्कानिरासमपेक्षते। तस्मान्नान्धपरम्परा। ननु परोक्षवेदस्य नियतरूपपदतत्क्रमानवधारणान्नबोधकत्वं संभवति। उच्यते। पदानां क [क्र] मावधारणमनुपयोगि, येनकेनचिदपि क्रमेण प्रयुक्तानां बोधकत्वदर्शनात्। यथा 'गामानय' 'आनय गाम्' इति। पदव्य [पदानाम]र्थ भेदप्रतिपादनशक्त्यवच्छिन्नतयैवावधारणमर्थावगतावुपयुज्यते, न समस्तेतरव्यावृत्ततयावधारणम्। यथा 'वृषभमानय' इति केनचिदुक्ते किं 'ऋषभमानय' इत्युच्चारितं उत वृषभमिति उत वृषमिति सन्दिहानोऽपि श्रोता ऋषभप्रतिपादकपदवदनेन प्रयुक्तमित्येव [त्येतावन्मात्रा वगमादेव] अर्थं प्रतिपद्यते। तद्वदिहाप्यष्टकाद्यर्थप्रतिपादन शक्ति [नि] रूपितपदावगमादेव अर्थ प्रतीतिरिति सिद्धम्। नन्वेवं इ [श्रु] त्यनुमानादेवार्थस्य निश्चितत्वात् कथमनुमीयमानस्य वेदस्यानुवादरूपस्य प्रमाणता। मैवम्। नापौरुषेयवाक्यस्यानुवादत्वम् प्रामाण्यमावहति। तद्धि स्वार्थे मानान्तरापेक्षया न बोधकम् अपौरुषेयत्वादेव निरस्तशङ्कत्वात्स्वत एव बोधकम्। वाक्यान्तरार्थे निर्ज्ञाततात्पर्यत्वात् तत्प्रवृत्तिमपेक्षते ननु शङ्कानिरासः (रासाय)।

तस्मान्नाप्रामाण्यापत्तिः। नन्वेवमि [मप्य]त्यनुमानपूर्वकमेव; अनुमानाद्योर्थस्य निश्चयं तत एव स्मृतिवाक्यस्य प्रणयनं न वेदजप्रमात इति कथं तत्पूर्वकत्वम्। एवं यावद्धि परोक्षवाक्यस्य बोधजनकत्वं नावगतं तावत् तस्यापि कारणत्वसंभावनायां श्रुत्यनुमानं तत्पूर्वकमर्थानुमानं च द्वयमपि प्रसक्तबाधमवतिष्ठते। तन्निवृत्तिश्च परोक्षवेदा [त्; ततः प्रमित्य]त्वत्प्रमित्यनुत्पत्ति दर्शनादिति परोक्षजवेदप्रमावशेन स्थिरीकृतयोः श्रुत्यनुमानतत्पूर्वकार्थानुमानयोः वाक्यप्रणयनमिति वेदजप्रमापूर्वकत्वं स्मृतिवाक्यानाम्। नन्वत्र किमनुमीयते। वाक्यमितिब्रूमः। नन्वानुपूर्वीविशेषभाजां पदानां वाक्यत्वम्। न चात्र पदानामानुपूर्व्यमस्ति। उच्चारणाभावात्। तत्कथं वाक्यत्वम्। मैवम्। नानुपूर्वीविशेषोपि च पदानां वाक्यत्वे विवक्षितम्। किं तु एकप्रयोजनतैव। सा चेहानुमेयपदानामस्ति। तथाहि—इह तावदष्टकादिपदानि यावन्ति यदर्थप्रतिपादनशक्तानि यदेकप्रयोजनानि च तानि पदान्यनुमीयन्ते। तस्मात्तेषां वाक्यत्वम्। नन्वेवं सति तेषां पदानां लोके प्रसिद्धत्वात् प्रत्यक्षत्वमिति कथमप्रत्यक्षत्वम्। मैवम्। येनोच्चारणेन तानि पदानि तदेकप्रयोजनतया संपद्यन्ते तथाविधोच्चारणाभिव्यक्तत्वाभावात् परोक्षाणीत्युच्यन्ते। नन्वेवं सति

---

१. नन्वेवं सत्यन्धपरम्परा स्यात्—पूर्वप्रमाणापेक्षामात्रान्नान्धपरम्पराप्राप्तिः इति वैलक्षण्यस्य वक्ष्यमाणत्वेन "न" इति त्रिपुरस्थलेषु ग्रन्थपातः संभावितः प्रतीयते॥

तथाविधोच्चारणाभावे कथं तेषामेकप्रयोजनता। नावश्यमुच्च [मुच्चारितानामवैक] प्रयोजनता। अपितु स्मारितानां भारतादिपदानामपि;[1] अत एव विशेषनिरोधोऽपि न वाच्यः। तेषां च पदानां वाक्यभूतानामपि पुरुषार्थविवक्षापूर्वकसहोच्चारणाभिव्यक्ततत्वाभावादपौरुषेयतया वेदत्व-मवगन्तव्यम्। एतच्च लिङ्गादिकल्पितश्रुतिवादिनामपि समभ्युपगन्तव्यम्। ननु चैत्यवन्दना-दिस्मृतीनामप्यनेन मार्गेण वेदमूलता किमिति नाश्रीयते। तद्वाक्यादेवावेदमूलत्वावगतेः। ननु तद्वाक्यं निर्मूलत्वान्न प्रमाणम्। सत्यम्। योगिप्रत्यक्षताप्रतिपादनेन प्रमाणम्, अवेदमूलताप्रतिपाद-नांशे तु प्रमाणम्। तस्माच्च वाक्या [द्वय] न्वयमवगम्यते अवेदमूलत्वं योगिप्रत्यक्षमूलत्वं च तत्र, यस्मिन्नंशे मूलज्ञानं [न] संभावितं तस्मिन्नंशे माभूत्प्रमाणम्। यत्रांशे संभवति तत्र भवत्येव प्रमाणमिति न वेदमूलत्वमनुमातुं शक्यते। किञ्च बुद्धेन वेदप्रामाण्यमपि नाङ्गीकृतम्। अतोपि न वेदमूलत्वमनुमातुं शक्यते। तस्माद्भ्रान्तिमूलत्वात्तेषां स्वतःप्राप्तापूर्वकार्यपरत्वा-संभवात् क्रियाकार्यपरत्वमेवाश्रीयते। मन्वादिस्मृतीनांतु वेदमूलत्वं न बाधितम्। तेषां वेदार्थानुष्ठातृत्वा [द] ङ्गीकृतवेदप्रामाण्यत्वात्। स्वयं चान्यमूलस्यानुक्तत्वात्। तस्मादष्टकादि-स्मृतीनां वेदमूलतेति सिद्धम्।

नित्यानुमेयश्रुतिमूलतेयं मन्वाद्युपज्ञस्मृतिभारतीनाम्।
प्रसाधिता क्षीरसमुद्रवासिमिश्रेण वादीन्द्रविजित्वरेण॥

इह तु प्रत्यक्षश्रुतिविरुद्धया स्मृत्या वेदानुमाने सति वेदस्याप्रामाण्यमापद्यते न वेति विचार्यते। नाप्राण्यमिति पूर्वपक्षवादी मन्यते। तथाहि—इह तावत् "औदुम्बरी स्प्रष्टव्या" इति या प्रत्यक्षश्रुतिः तस्याः "औदुम्बरी सर्वा वेष्टयितव्या" इति श्रुतादनुमितया किमित्यप्रामाण्यमा-पद्यते। तया विरुद्धार्थत्वात् अन्ये [मे] ति चेत् तदयुक्तम्, विरुद्धार्थत्वासिद्धेः। स्पर्शन-वाक्यं हि स्पर्शनं कार्यं प्रतिपादयति वेष्टनवाक्यमपि वेष्टनम्। नच कार्यद्वयस्वरूपं परस्पर-विरुद्धम्, एकवस्त्वधिष्ठानतया हि युगपदसंभवात् स्वभावद्वयमवगम्यते। मानसंविदोः व्याघात-मापादयति कार्यद्वयं च साध्याबन्धभेदाति हि (?) त भामन्योन्य? वर्णानभिज्ञमिति न तद्विरोधात्तत्संविदोर्व्याघातः शक्यते वक्तुम्। केवलं तुल्यं तु कार्यत्वात् [तुल्य कार्यत्वात्] सहानुष्ठानासंभवमात्रम्। नच सहानुष्ठानासंभवात् कार्ययोर्विरोधः तथा सति ग्रहणाग्रहणयोरपि स्यात्। अथ तत्रापि विरोधोऽस्त्येव स तु विकल्पाश्रयणेन परिह्रियते इत्युच्येत अत्रापि समानम्। अथात्र प्रत्यक्षश्रुतिः शीघ्रभाविनी अनुमेयश्रुतिः विलम्बितप्रवृत्तिरिति विषमत्वान्न विकल्प इति चेत्? किमिदंराजशासनम् शीघ्रविलम्बयोर्न विकल्प इति। न ह्यत्र हेतुं कंचित् पश्यामः। अस्तु वा विकल्पाभावः अथाप्यसञ्जातविरोधित्वात् पूर्वेणोत्तरस्य वा पौर्वापर्यतया द्वो [वो] त्तरेण पूर्वस्य किंबाध इत्येवमाश्रयणादेवान्योन्यव्याघातं परिहर्तुं शक्यते। तस्मान्न-व्याघातनिबन्धनमप्रामाण्यमापद्यते चोदनायाम्। अत्रोच्यते। वेष्टनश्रुतावनुमिता [यां] विरु-द्धार्था स्पर्शनश्रुतिर्भविष्यति। न ह्येकस्यामौदुम्बर्यामेकस्मिन् काले एक [ऋत्व] त्वार्थतया स्पर्शनं वेष्टनं च शक्यं कर्तुम्। नन्वनुष्ठानवि [रो] धमात्रमिदं न कार्ययोर्विरोधोऽस्तीत्युक्तम्।

---

१. अतएव विशेषनिरोधोऽपि न वाच्यः—स्मारितानामप्येकप्रयोजनत्वस्यावगन्तुं शक्यत्वादुच्चारणस्यानपेक्षित-त्वाद्वैदिकानीमान्येव पदान्युच्चारणीयानीति निर्बन्धोऽप्रामाणिक इति भावः॥

अनुष्ठानविरोध एव हि कार्यविरोधः। तथाहि--एकस्याः कृतेः युगपद्द्वयसंबन्धाभावोऽनुष्ठानविरोधः। कृतिसंबन्धितैव कार्यता । अतो वेष्टनस्पर्शनाभ्यां विरुद्धाभ्यां युगपदेकस्याः कृतेः संबन्धित्वविरोधे सति तयोः कार्यतैव विरुद्धा भवति। एककृत्यपेक्षयैव हि तयोः कार्यत्वम्। न भिन्नकृत्यपेक्ष [या] म्। अस्तु [वा] विरोधः; तथापि तत्कार्यविषयश्रुत्योः कथमप्रामाण्यम् ?

परस्परविरुद्धार्थविषयतया व्याहतम् संविज्जनकत्वं इतिचेत्, कोऽयंसंविदोर्व्याघातो नाम ? ययोः संविदोः यादृशधर्मविशिष्टवस्तुव्यवहारानुगुण्यं, तयोरेकस्मिन्वस्तुनि युगपत्तादृशधर्मद्वयविशिष्टव्यवहारानुगुण्यासंभवो विरोधः। यदा स्पर्शनं कार्यमिति व्यवहारानुगुणा संवित् न तदा वेष्टनं कार्यमिति व्यवहारानुगुणा संवित् इति सोऽयं व्याघात्तः। कथा [तथा] युगपदसंभवदनुष्ठानफलकतयापि संविदोर्व्याधातः। एवंचसति व्यवहारानुगुण्यानुष्ठानफलकतया व्याप्तत्वात अनुष्ठेयसंविदोः व्याघातफलभूतप्रकारयुगलद्वयव्याधाते युगपदनुत्पत्तिरेवोक्ता भवति। तथाच सति एकया संविदा भवितव्यमिति स्थिते किमनुमितिश्रुतिसंविद [दि] त्वादि कालतः (?) प्रत्यक्ष श्रुतिमितिसंशयादनुत्पादकत्वमेव संविदःस्यात्। नन्वेवंविधव्याघाते सत्यपि ग्रहणादिवाक्यानां बोधकत्वं दृष्टम्; सत्यम्; तत्र पर्यायेण बोधकत्वाश्रयणात् व्याधातः परिह्रियते। नन्विहापि किमिति तथा न भवति? युगपदनुपस्थितत्वात् श्रुतिद्वयस्य। प्रत्यक्षश्रुतिः प्रथमोपस्थानवती तदानीं विरोधश्रुतिः अनुमषां [तेरनुन्मेषात्] नित्यवद्बोधजनकतया सा श्रुतिरवगम्यते; पश्चात् अनुमान सन्निहितापि श्रुतिः नित्यवत्तद्विपरीतबोधजनकतयावगम्यत इति नित्यवद्विरुद्धबोधजनकत्वयोः विरुद्धार्थत्वात् तद्ग्राहिणोः संविदोरपि व्याधातात् बोधजनकत्वमेवानिश्चितम्॥

[1]ननु पौर्वापर्यनयात् श्रुतिलिङ्गनयाद्वा पूर्वस्य परस्य वा दौर्बल्यं भविष्यति। नेतिब्रूमः। यत्रहि पूर्वशास्त्रं क्वचित्सावकाशं तत्रपरेण बाधः। इह तु निरवकाशं पूर्वशास्त्रम्। तस्मान्नपरेण बाधः। तथा यदा पूर्वेण उत्तरस्यानुत्पत्तिरेव क्रियते तत्रोत्तरस्य बाधः। इह चोत्तरस्यानुत्पत्तिस्तावन्नास्ति। तस्मान्नोत्तरस्यापि बाधः। तत्र [यत्र] तु विरुद्धश्रुतिद्वयं युगपदवस्थितं, तत्र तु द्वयोः युगपद्बोधजनकत्वासंभवात् बोधजनकत्वज्ञानयोश्चाक्रमभावित्वात्[2] प्रथममेव पर्यायेणैव बोधजनकत्वमनयोरवगम्यत इति नास्ति विरोधः। तस्मात् स्थितमिदं विरुद्धा [यां श्रु] श्रितावनुमिताया म प्रामाण्यमापद्यत इति। सा तु नानुमीयते, प्रत्यक्षश्रुतिबाधितविषयत्वादेवानुमानानुत्पत्तेः।

ननु प्रत्यक्षश्रुतिः स्पर्शनकार्यविषया; अनुमानं तु वेष्टनश्रुतिविषयमिति भिन्नविषयतयानुमानस्य कथं श्रुत्या बाधः। [3]अन्तर्भावितवेष्टनकार्यप्रमेयकमेव श्रुतिप्रमाणमनुमीयत इति तुल्यविषयत्वमस्तीति श्रुत्या बाध्यतेऽनुमानम्। तस्मात्सर्वमवदातम्।

इह तु व्याकरणस्मृतिः प्रमाणं नवेति विचार्यते। अप्रमाणमिति पूर्वः पक्षः। प्रमाणमिति सिद्धान्तः। कथं पुनरप्रमाणम् ? मूलप्रमाणाभावात्। तथाहि--इह व्याकरणे सास्नादिमदाद्यर्थे गवादीनां साधु [त्वं] त्वेन गाव्यादीनामिति प्रतिपाद्यते। न चास्मिन् विभागे प्रमाणं

---

१. उपक्रमोपसंहारयोरन्यतरेणान्यतरस्य बाधमङ्गीकृत्य विरोधः परिहर्तुं शक्यते, तत्र तार्तीयीकासञ्जातविरोधित्वन्यायेन पूर्वेणोत्तरस्य वा पाष्ठापच्छेदन्यायेनवोत्तरेण पूर्वस्यबाधः इति न्यायेनेतिभावः।

२. अक्रमभावित्वात्–युगपदुत्पन्नत्वात्॥

३. अन्तर्भावित–प्रमाणस्य प्रमेयावभासकप्रयोजनतया प्रमेयविशिष्टमेव श्रुतिरूपप्रमाणमनुमेयमित्यभिसन्धिः॥

संभवति। ननु प्रयोगदर्शनात् गवादीनां साधुत्वमवगम्यते, विपययात् गाव्यादीनामसाधुत्वम्; तदयुक्तम्, उभयेषामपि प्रयोगदर्शनात्; गाव्यादीनामपि प्रयोगोऽस्ति। अथ शिष्टप्रयोगात् साधुत्वं, तदभावात् असाधुत्वमिति, तदयुक्तम्। गाव्यादीनामपि शिष्टैरेव प्रयुज्यमानत्वात्। [1]तथा व्यासादिप्रयुक्तानामपि केषांचिदसाधुत्वात्। अशिष्टप्रयक्तानामपि कादीनां (?) साधुत्वात् अथ प्रयोगदर्शनेऽपि [न] येषामशक्तिप्रमादभ्रान्त्यभिप्रायप्रभवता तेषां साधुत्वम्, इतरेषामसाधुत्वमिति नैवम्; प्रयोगदर्शनाविशेषे सति केषांचिदेवाशक्त्यादिप्रभवता, केषां चिन्नेति कुतोऽवगम्यते। यवै [यथैव] हि गोशब्दे प्रयुक्ते सास्नादिमानवगम्यते वृद्धव्यवहारे तथा गावी शब्दे प्रयुक्तेऽपि। ततः कथमयं विभागोऽवगम्यते––अयमशक्तिजः नायम् इति (?) प्रयोक्तृवाक्यात् इति। नैवम्। तदपि वाक्यं किं शक्तिजं, उत अशक्तिजम्––इति शङ्कानिरासाय वाक्यान्तरापेक्षायामनवस्थाप्रसङ्गात्। अथ अर्थप्रकरणादिवशात् गोशब्दोच्चारणं कस्यचिच्चिकीर्षितमित्यवगम्यते [तथा] सति तेन गावीशब्दे प्रयुक्ते सति अशक्तिजोऽयमित्यवगम्यते, मैवम्; गोशब्दोच्चारणापेक्षा न कस्य चिदवगन्तुं शक्यते; क्षीराद्यर्थित्वावगमात् शक्यतामिति चेत्, न शक्यम्, तदर्थित्वेऽपि सास्नादिमत्प्रतिपादकशब्दोच्चारणमात्रेच्छावगम्यते, न प्रतिनियतशब्दोच्चारणेच्छा। नन्वेवं सास्नादिमत्प्रतिपादकशब्दोच्चारणेच्छावगमात् तदशक्तिजत्वं निश्चीयते; मैवं; गावीशब्दमपि किं सास्नादिमत्प्रतिपादकतयावगम्य प्रयुक्तवान्. उत सास्नादिमत्प्रतिपादकशब्दशक्त्या इति सन्देहात्। तस्मात् न प्रयोगदर्शनमात्रान् साधुत्वासाधुत्वविभागोऽवगन्तुं शक्यते। तथा साधुशब्दानामनन्तत्वात् प्रयोगदर्शनमपि सर्वेषां न संभवति। असाधूनामप्यानन्त्यात्, सर्वेषामतीतानागतवर्तमानानामशक्तिजत्वं नावगन्तुं शक्यते। व्याकरणान्तरात् साध्वसाधुविभागोऽवगम्यत इति चेत्, न, अन्धपरम्परात्तेः। किञ्च व्याकरणमपि, गवादयःसाधवः, गाव्यादयो नेति प्रतिपादयितुं न शक्तम्; नहि गाव्यादयोऽसाधव इति किञ्चिद्वाक्यं व्याकरण उपलभ्यते। अथ गाव्यादयः साधव इत्युक्ते तदितरेऽसाधव इति गम्यत इति चेत्, न; गवादयः साधव इत्युक्ते तेषां साधुत्वमात्र गम्यते, नेतरेषामसाधुत्वमपि। अथ तावन्मात्रावगमे व्याकरणं व्यर्थं माभूदिति तदितरेषामसाधुत्वं गम्यत इति चेत्, न, विरोधात्। यदि हि अनादिव्याकरणपरम्परायां गाव्यादीनामसाधुत्वं स्मर्येत, तदा अनादिस्मृतिपरम्परानिबन्धनत्वात् अनादित्वं गाव्यादीनामाश्रयणीयम्; अनादिप्रयोगवतश्च नासाधुत्वं शक्यते वक्तुम्। व्याकरणान्तरव्याधाताच्च साध्वसाधुविभाग प्रतिपादनानुपपत्तिः। तथाहि––इह प्राकृतद्रमिडादि व्याकरणैः प्राकृतादीनां साधुत्वं स्मर्यत इति तदितरेषां गवादीनां असाधुत्वापत्तिः। अतश्च पाणिनिव्याकरणवशेन येषां साधुत्वं तेषां साधुत्वं; येषां चासाधुत्वम्, [2]तेषामसाधुत्वमिति व्याकरणान्तरवशादापद्यते। अथ व्याकरणान्तराण्यप्रमाणानि, न, आप्तपुरुषप्रणीतत्वाविशेषे कथं किंचित् प्रमाणं किंचिन्नेति व्यवस्था?

---

१ तथा व्यासादि–भारतादिषु वैयासिकेषु प्रयोगाणामार्षाणामपि दर्शनेन तेषां व्याकरणानुरोधेनासाधुत्वमुक्तम्। तथा अशिष्टप्रयुक्तानामपि कादीनां साधुत्वादिति ककारस्यादित्वादेवमुक्तम्। इदं चोपलक्षणं म्लेच्छैरेव अर्थविशेष प्रयुक्तानामार्यैरनुपयुक्तानां शब्दानामपि। तत्रापि शिष्टप्रयोगाभावः साधुत्वं चेत्युभयमप्यवगम्यते॥

२ तेषामसाधुत्वमिति–अस्याः पङ्क्तेरनन्तरं 'एतदपि' इतिपदस्य पातरसम्भावितः प्रतीयते। एतदपि व्याकरणान्तरवशादवगम्यते। अत्र पाणिनिव्याकरणस्यैवाभ्यर्हिततायां नियामकमन्यदेव प्रतिपादनीयमपेक्षते पूर्वपक्षी॥

अथ [1]व्याघातपरिहाराय निबद्धेतरशब्दानामसाधुत्वं क्वचिदपि व्याकरणे नोच्यत इतिचेत्, एवं तर्हि व्याकरणेनैव साध्वसाधुविभागानवगमप्रसङ्गः। किञ्च [सा] असाधुत्वमपि कीदृशमिति न विद्मः, तदपरिज्ञानात्। विपर्ययात्मकमसाधुत्वमपि नावगम्यते। अर्थप्रतिपत्तिसाधकत्वं हि साधुत्व मिति चेत्, तर्हि गाव्यादीनामपि साधुत्वप्रसङ्गः, तेषामप्यर्थप्रतिपत्तिसाधकत्वात्। अथ तेषामप्यर्थप्रतिपादनशक्तिर्नास्ति, गवादिशब्दोपस्थानद्वारा अर्थप्रतिपादकत्वादितिचेत्, तर्हि गौणलाक्षणिकशब्दानामसाधुवप्रसङ्गः। तेषामपि मुख्यार्थोपस्थानद्वारा अर्थप्रतिपादकत्वात्। तथाकमित्यस्य वेदस्य [स्थ] कास शब्दोपस्थापनद्वारार्थप्रतिपादकस्य साधुत्वं, न स्यात्। अथानादिप्रयोगत्वं साधुत्वं यस्य शब्दस्य यदर्थे प्रयोगोऽनादिः तत्र [स] साधुरिति चेत्, एवमपि गौणलाक्षणिकानामसाधुत्वप्रसङ्ग, : तेषामपि मुख्यप्रयोगपूर्वकत्वादादिमत्ता यतः। अथ साधुत्वं नाम जातिभेद इति चेन्न, शब्दस्यजात्यनाधारत्वात्, जातिग्राहकप्रमाणाभावाच्च। प्रत्यक्षेण हि सर्वत्र जातिरवगम्यते। नच गवादिशब्दानुपलभमानेन गाव्यादिव्यावृत्तः गवाद्यनुगतः कश्चिदाकारभेदः प्रत्यक्षीक्रियते। अथ व्याकरणस्मृतिसहायं श्रोत्रं साधुत्वजातिं गृह्णातीति चेत्, न, [ननु] व्यापकाति व्यापकादिदोषोण [दु] दृष्टस्य व्याकरणस्य सहायत्वानुपपत्तेः। किञ्च प्राकृतादिष्वपि तत्तत्स्मृतिवशेन साधुत्वग्रहणप्रसङ्गः। अथ स्वर्गसाधनत्वं साधुत्वं, तन्न, तथा सति व्याकरणस्मृतेरपि श्रुतिमूलता अभ्युपगता स्यात्। दृष्टमूलं व्याकरणमिति भवतामभ्युपगमः। तस्मात् साध्वसाधुस्वरूपापरिज्ञानादपि व्याकरणस्मृतिरप्रमाणम्; तदप्रामाण्येव [ण्यादेव] वेदे प्रयुक्तानामश्वादिशब्दानामध्यवसितार्थत्वं न स्यात्। अश्वशब्दो हि लोके निस्वे भ [ह] ये च प्रयुक्त इति द्वयोरपि वाचकतयावगम्यते, अगृह्यमाणविशेषत्वात्। नच यववराहादिवत् वैदिकवाक्यशेषानुगुण्यात् कस्य चित्प्रयोगस्य बलीयस्त्वं निश्चेतुं शक्यते, वाक्यशेषाभावात्, परस्परस्वरसादृश्याभावेनान्य क्लृप्तशक्त्यैवेतरत्र प्रयोगस्योपपादयितुमशक्यत्वाच्च। नच अर्थप्रकरणादिवशान्निश्चयः, प्रकरणादिगतब्शदानां अशक्त्यादिवशेन क्वचिदर्थान्तरेऽपि प्रयुज्यमानत्वात्। तेषामप्यनेकार्थतयानध्यवसितत्वात् न ततोऽपि निश्चयः। ननु व्याकरणप्रामाण्ये तन्निबन्धनस्य शब्दस्यानेकार्थत्वे कथमर्थाध्यवसायः? प्रकरणादि [भेंदे] नेति वदामः। तत्प्रामाण्ये हि तन्निबन्धनानां न सर्वेषामनेकार्थत्वम्, किंतु केषांचिदिति प्रतिनियतार्थवृत्तिभिः पदैः प्रकरणादिगतैः अध्यवसायोपपत्तिः। तस्मात्[2] व्याकरणस्याप्रामाण्यात् वेदोऽप्रमाणमिति पूर्वः पक्षः।

अत्रोच्यते––व्याकरणं प्रमाणम्; तत्साधनार्थं प्रमेयभूतसाध्वसाधुरूपं तावन्निरूप्यते। अनादिप्रयोगत्वं साधुत्वम्। यस्य शब्दस्य यस्मिन्नर्थे प्रयोगोऽनादिः, न तु पुरुषशक्त्या प्रमादाद्वा भ्रमेण वा सङ्केतेन वा कुतश्चित्कालात्प्रभृति क्वचिदर्थे प्रयोगः स तत्र साधुः, तद्विपरीतोऽसाधुः। नन्वेवं गौणलाक्षणिकयोरसाधुत्वप्रसङ्गः, तयोरप्यादिमत्वात्; मैवम्, तयोरप्यनादिप्रयोग-

---

१ व्याघातपरिहाराय—स्वीयव्याकरणस्य प्रामाण्यव्यवस्थापनाय प्रवृत्तैरन्यव्याकरणानामप्रामाण्ये उपपादिते, तयैवोपपत्या स्वीयस्यापि व्याकरणस्याप्रामाण्यप्रसङ्गात् इत्यर्थः॥

२ तस्मात् व्याकरणस्याप्रामाण्यात् वेदोऽप्रमाणमिति–व्याकरणस्य वेदार्थाविष्करणद्वारा वेदाङ्गत्वात्तस्याप्रामाण्ये तन्निर्धारितार्थबोधकत्वस्य वेदस्याप्रामाण्यं–अथवा–व्याकरणस्य स्मृतित्वेन प्रामाण्यात्तदप्रामाण्ये तन्मूलभूतस्य वेदस्याप्यप्रामाण्यम्॥

त्वम् (त्वात्)। ननु माणवके अग्निशब्दप्रयोगः इदंप्रथमः, तस्य [1]माणवकभेदस्य पूर्वमसत्वात्, सत्यम्, माणवकभेदे इदंप्रथमः, नत्वग्निसदृशे। तथा गङ्गाशब्दस्यापि तीरे प्रयोगः आदिमान्, न तु गङ्गासंबन्धिनि। ननु अनादित्वेऽविशिष्टे सति कथं मुख्यपूर्वको गौण इत्युच्यते मुख्यार्थ ग्रहणविषयशक्तिग्रहणपूर्वकत्वात् गौणलाक्षणिकव्युत्पत्तेः। तथाहि—ज्वलनविषया मुख्या शक्तिः येनाग्निशब्दस्य गृहीता तस्य अग्निसदृशे प्रयुज्यमानमग्निशब्दमुपलभमानस्य किमत्र शक्तिरस्यास्ति उत नेति विमर्शो जायते। नात्र शक्तिरस्ति, तामन्तरेणापि अर्थसामर्थ्यादेव प्रयोगोपपत्तेः। तथाहि—अग्निशब्दादुपस्थापितोऽग्न्यर्थः स्वसदृशमर्थान्तरमुपस्थापयतीति न तत्र शक्तिः कल्पयितुं युक्ता, अन्यथासिद्धत्वात् प्रयोगस्य। ननु यद्यग्निशब्दस्य तत्सदृशपरत्वमपि व्युत्पन्नम्, तर्हि मुख्यार्थसंभवे किमिति तत्वं प्रतिपादयति, [2]तस्यापि उपाधित्वेन गृहीतत्वात्। स चैवं व्युत्पन्नं तादृशादग्निशब्दाद् गौणार्थं प्रतीत्य व्युत्पत्तिकालवर्तिनं प्रयोज्यवृद्धमत्येवमेवानुमापयति। सोऽपि यथोक्तेन प्रकारेण पूर्ववृद्धप्रयोगे गौणार्थे व्युत्पत्तिमान्, अग्निशब्दात् गौणार्थप्रतिपत्तिमत्त्वात्, मद्वत इति। सोऽप्येवम्, सोऽप्येवमिति-प्रयोगात् अनादित्वं गौणेऽप्यर्थेऽवगम्यते। नन्वनादित्वेऽविशिष्टे कथं ज्वलन एव शक्तिर्गृह्यते, न तत्सदृशे; विपरीतमपि संभाव्यते—गौणो ज्वलने, मुख्यस्तत्सदृशे इति। मैवम्; ज्वलनप्रतीतिमन्तर्भाव्यैव तत्सदृशे प्रतीतिः नतु तत्सदृशप्रतीतिमन्तर्भाव्यैव ज्वलन प्रतीतिः; तदिदं प्रतीतिवैषम्यं ज्वलने शक्तिकल्पनां विना नोपपद्यत इति तत्रैव शक्तिः कल्पयितुं युक्ता। यदि हि ज्वलने गौणः स्यात्, तत्सदृशप्रतीतिमन्तर्भाव्यैव तत्प्रतिपत्तिः स्यात् अर्थसामर्थ्येनैव गौणार्थप्रतीतेः।

तस्मान्न विपर्ययः। ननु येन प्रथमं गौणविषय एव प्रयोगो दृष्टः, तत्र शक्तिकल्पना आपद्यते, प्रयोगस्यान्यथासिद्ध्यनवगमात्। सत्यम्, जाताऽपि सती शक्तिकल्पना पश्चाद [न]न्यथासिद्धज्वलनविषयप्रयोगदर्शनेन शक्तिकल्पनायां जातायां तयैव पूर्वदृष्टप्रयोगस्यान्यथासिध्यवधारणात् बाध्यते। तदेवं गौणलाक्षणिकयोरप्यनादित्वम्। तथा वैदिकस्य कर्मित्स्यापि अनादित्वम्, वेदस्यानादित्वात्। ननु देवदत्तादीनां कथमनादित्वम्, संकेतप्रभवत्वात्तेषाम्? उच्यते। इह खलु सर्वशब्दानां साङ्केतिकेप्यर्थे अनादिः प्रयोगः। यो हि शब्दो यस्मिन्नर्थे संकेत्यते स तमर्थं बोधयतीति दृष्टम्। तत्र केचित् अर्थान्तरवाचका अपि सांकेतिकेऽपि प्रयुज्यन्ते, यथा देवदत्तादयः। केचित्सांकेतिक एव नित्यं प्रयुज्यन्ते, यथा डित्थादयः। तस्मात् तेषामप्यनादित्वम्। ननु इदानीमेव प्रतिनियतार्थविषयं संकेतपूर्वकं प्रयोगमुपलभमानेन कथं पूर्वकालेऽपि सांकेतिकार्थविषयप्रयोगास्तित्वमवगम्यते? अनुमानादिति ब्रूमः। प्राच्यकालः सांकेतिकार्थविषयदेवदत्तादिशब्दप्रयोगवान्, कालत्वात्, इदानींतनकालवत इति। तदेवं साधुत्वमनादित्वं, आदिमत्वमसाधुत्वम्—इति। तत्र च व्याकरणं प्रमाणम्, मूलप्रमाणसंभवात्। तथाहि—ये तावत् गवादयो दृष्टप्रयोगाः तेषामात्मानं दृष्टान्तीकृत्य पूर्वेऽपि पुरुषाः पूर्वप्रयोगात् गवादिशब्दानां सास्नादिमदाद्यर्थे शक्तिं गृहीतवन्तः, गवादिशब्देभ्यः सास्नादिमदाद्यर्थप्रतिपत्तिमत्वात्, मद्वत्,

---

१. माणवकभेदस्य—यस्य कस्य चिन्माणवकस्येत्यर्थः॥

२. तस्यापि उपाधित्वेन गृहीतत्वात्—मुख्यार्थविषयकविवक्षाभावकालिकत्वोपहितस्य सदृशार्थप्रतिपादकत्वाभ्युपगमात॥

इति तेषां प्रयोगानामादितामनुमानादवगच्छति । ननु निघण्ट्वादिभ्योऽपि व्युत्पत्तिदर्शनात् कथं पूर्वपूर्वप्रयोगादेव सर्वेषां व्युत्पतिरनुमातुं शक्यते? मैवम्, निघण्टुककाराणापि यावत् मूलभूतप्रयोग, दर्शनं नानुमीयते तावत् तद्वाक्यानां बोधकत्वमेव नोपपद्यत इति तेभ्योऽपि पदपदार्थसम्बन्धव्युत्पतिर्भवति प्रयोगमूलैवेति नानैकान्तिकत्वं हेतोरस्ति । ननु साधुशब्दानामनन्तत्वात् सर्वेषां प्रयोगदर्शनासंभवात् कथं प्रयोगानादित्वं अवगन्तुं शक्यते? पूर्वव्याकरणाददृष्टप्रयोगाणामपि हि प्रयोगानादित्वमगम्यते । ननु पूवव्याकरणप्रणेतुरपि सर्वप्रयोगदर्शनाभावात् तस्यापि प्रयोगादित्वे मूलज्ञानाभावात् कथं तद्वाक्यादपि निश्चयो जायते? सोऽपि कांश्चित् प्रयोगानुपलभते, स्वयमनुपलब्धप्रयोगान् पूर्वव्याकरणादवगच्छति, पूर्वोप्येवम्, पूर्वोप्येवम् इति नास्ति स्मृतीन स्मर्तृणां चादिः; तत्रानन्तेषु स्मर्तृषु केनचित् केषुचित् दृष्टप्रयोगा इति सर्वैः सर्वप्रयोगदर्शन संभवात् नामूलत्वं वक्तुं शक्यते । ननु स्मृतिपरम्परानादित्वं कथमवगम्यते, तद्व्यतिरेकेण मूलासंभवात् । इह तावदाप्तप्रणीत्वेन व्याकरणस्य मूलं किंचिदस्तीत्यवगम्यते । तच्च समानार्थस्मृतिपरम्परानादित्वे सत्युपपद्यते । तथाहि--दृष्टप्रयोगाणामदृष्टप्रयोगाणां च साधुत्वात् व्याख्यानरूपे व्याकरणान्तरे कल्पिते दृष्टप्रयोगाणां विरोध्यादिमत्तानवगमात् प्रयोगानादित्वमनुमातुं शक्यते; अदृष्टप्रयोगणां तत एव व्याकरणात् प्रयोगानादित्वमवगम्यते [अतः] सम्यङ्मूलतोपपत्तिः । यद्येवं गाव्यादीनामपि प्रयोगदर्शनाविशेषात् आदिमत्ता ज्ञातुं न शक्यते; प्रत्युत गवादिष्विवानादित्वमभ्युपगन्तुं युक्तम्, तेषामशक्यादिभवत्वं निश्चीयताम् । तथाहि--इह तावत् क्षीरमिच्छता केनचित् गावीमानयेत्युक्तम् । तद्वाक्यश्रवणाच्च प्रयोज्यवृद्धस्य गवानयने प्रवृतिं दृष्टा प्रवृत्तेश्च गवानयने बुद्धिरपि जाता इत्यवगता । तत्र व्युत्पित्सो रेषा संप्रधारणा जायते--किमस्य गावीशब्दस्य सास्नादिमत्प्रतिपत्तिशक्तिरस्ति, नास्तीति । तत एवं निरूपयति--यदि प्रयोगप्रतिपत्योः अन्यथासिद्धिरस्ति, ततः शक्ति र्नास्ति. यद्यनन्यथासिद्धिः, ततः शक्तिरस्तीति; एवं विमृश्य तत एवं निश्चिनोति-- अयं खलु शब्दः गोशब्दसदृशः; अतस्तमुच्चारयितुकामेन अशक्त्या प्रमादेन वायमुच्चारित इति संभाव्यते । तेन हि स्वस्मिन्नेव शब्दान्तरोच्चारणेच्छायामशक्त्या तत्सदृशशब्दोच्चारणं कदाचित्प्रवर्तत इत्यवगतम् । तथा तत्सदृशे शब्द उच्चारिते प्रयोज्यवृद्धेन प्रयोजकवृद्धं क्षीरार्थिनमवगच्छता गावीशब्दश्चनोत [शब्दसदृशोपनयन] पूर्वं गावीत्युच्चारितवानित्येवमवगम्य गावीशब्दात् गोशब्दं बुद्ध्वा तत एवार्थोऽवगम्यत इत्येवमपि संभाव्यते । एवमन्यथासिद्धिमुद्भाव्य ततो निश्चिनोति--अयं खलु शब्दो नानादिः, व्यारणेष्वनुशिष्टत्वात् । आदिमत्वंच अशक्त्यादिप्रभवतया । अशक्त्यादिप्रभवस्य च सदृशशब्दोपनयनद्वारार्थे प्रयोगोऽन्यथासिद्ध इति न शक्तिरस्तीति । ये पि चिरतरप्रवृत्ता अपभ्रंशाः, तेषु यद्यपि पूर्वं पूर्वं व्यवहारवशेन शक्तिं ग्रहीत्वा अर्थावगमो दृश्यते, तथापि, तत्रान्यव्यवहारे व्युत्पित्सुना गावीशब्दादेवायमर्थावगमो जातः, न पुनस्तव [रुप] स्थापितगो शब्दात् इत्येवं भ्राम्यता शक्तिस्तस्य तत्र गृहीता, तत्पूर्वकस्तयोर्व्यवहारः । तत्रैवापरे भ्रान्त्या व्युत्पद्यन्त इत्येवं भ्रान्त्यापि शक्तिग्रहणपूर्वकव्यवहारपरम्परोपत्तेः न तेषामप्यनादित्वम्, किं तु आदिमत्वमेव, वाचकसदृशतया संभाविताशक्तिजत्वात्, अन्यथासिद्धत्वात् प्रतिपत्योः नास्य शक्तिः कल्पयितुं युक्तेति । ननु यदा [यथा] गोशब्दसदृशो गावीशब्दः यथा [तथा] गावीशब्दसदृशो गोशब्द इति, सोऽपि संभाविताशक्तिजः ।

मैवम्, तस्यानादिव्याकरणपरम्परानुशिष्टत्वात् आदिमत्ताज्ञानानुपपत्तः अनादित्वमनुमातुं शक्यत। गाव्यादीनां तु विपरीतादिमत्तोपलम्भात् अनादित्वमनुमातुं [न] शक्यते। आदिमत्ता च स्वयमेव यथोक्तप्रकारेण केषांचिदुपलभ्यते, केषांचित् पूर्वव्याकरणात् अनादित्वमेवेत्यवगन्तव्यम्, ऋषभवृषभादीनां सदृशानामपि व्याकरणेनानुशिष्टत्वादनादित्वमेवेत्यवगन्तव्यम्। ननु अनादित्वेऽपि किमिति शक्तिः कल्प्यते? [1]अनन्यथासिद्धत्वात् प्रयोगप्रतिपत्त्योः। आदिमत्वे हि शब्दान्तरोपस्थानद्वारा अर्थप्रतिपादकत्वोपपत्तेः न शक्ति [:] कल्पयितुं शक्यते। अनादित्वेऽपि यत्रान्यथासिद्धः प्रयोगः न तत्र शक्तिरस्ति, यथा गौणलाक्षणिकयोः। ननु ये शब्दाः क्वचिदप्यर्थे न प्रयुज्यन्ते यथा नदी गङ्गा करुणा इत्यादिषु स्त्रीप्रत्ययाः, यथाच प्रलम्बत इत्यादिषु प्रादयः, तेषां कथं साधुत्वम्? प्रयोगसाधुत्वादिति ब्रूमः। इह साधुः द्विविधः, कश्चिदभिधानसाधुः, कश्चित्प्रयोगसाधुः। यः शब्दः यस्मिन्नर्थे प्रतिपादकतयैवानादिप्रयोगवान्, स तत्राभिधानसाधुः; यः पुनः प्रतिपादकस्य साहाय्यं करोति स्वयमर्थान्तरवाचकतयावगतोऽपि स प्रयोगसाधुः। स्त्री प्रत्यया हि लिङ्गविशेषवचनतयावगता अपि नद्यादिशब्दस्य स्वार्थं प्रतिपादयतोऽनुग्रहे वर्तन्ते। किमिदमनुग्राहकत्वम्? तत्सहितस्य स्वार्थप्रतिपादकत्वम्। यद्येवं तस्याभिधानसाधुत्वमुपपद्यते। मैवम्। यत्रार्थे क्लृप्तशक्तिः तमर्थं हित्वार्थान्तरवचनतयागतस्वरूपस्य शब्दभागस्यानुग्राहक इति मत्वा प्रयोगसाधुरित्युच्यते। अत एवाभिधानसाधोः प्रयोगसाधुरयुक्त इत्युच्यते, इष्टस्वार्थपरत्वहानापत्तेः, शब्दान्तरस्य स्वार्थे नैरपेक्ष्यबाधापत्तेश्च। ननु प्रकृतिप्रत्यययोः स्वार्थेऽनादिप्रयोगवतोः क्रमविपर्ययेणापि किमिति प्रयोगो न भवति? उच्यते। परभूतस्यैव प्रत्ययस्य स्वार्थे प्रयोगो दृश्यत इति तथाभूतस्यैव तत्रानादित्वम्। प्रकृतेरपि पूर्वभूताया इति वेद्यम्। नन्वनादि [नन्वादि] मतोऽपि लोके बोधकत्वदर्शनात् वेदेऽपि किमिति तस्य बोधकत्वं न भवति? मैवम्। यतः प्रभृति योऽपभ्रंशःप्रवृत्तः ततः पूर्वं तस्य बोधकत्वमेव न युज्यते; वैदिकश्च प्रयोगोऽनादिरिति तस्यैवाबोधकत्वं चेति विरुद्धमापद्यते। यत्पुनः अनादिस्मृतिपरम्परानिबन्धनत्वादपभ्रंशानामप्यनादित्वप्रसङ्ग इति, तन्न, [2]गवाद्यपोहरूपेण तेषामसाधुत्वख्यापनं न प्रातिस्विकरूपेण। यदि हि तथा स्यात्, तेषामप्यनादिता भवेत्; न चैवमित्यदोषः। यत्पुनः व्याकरणान्तरविरोध उक्तः, सो पि नास्ति! तथाहि—इह संकेतप्रभवशब्दः द्रमिडप्राकृतादिरूपेणानेकविधाः। तत्र ये प्राकृतात्मकाः संकेतप्रभवाः तज्ज्ञानाय प्राकृतं व्याकरणं प्रणीतम्। तथा द्रमिडादिव्याकरणमपि। नन्व [न्वा]नादिमतामनादिस्मृतिपरस्परानिबन्धनत्वं कथम्? प्रयोजकरूपेण, न प्रातिस्विकरूपेणेत्यदोषः। ननु केषांचित् प्रातिस्विकरूपेणापि अनुशासनं दृश्यते। सत्यम्। केषुचिद्व्याकरणेषु, न सर्वेषु पूर्वव्याकरणेषु। तेषामपि लक्षणतोऽनुशासनं न स्वरूपेणेत्यदोषः। तस्मात् सर्वमनवद्यम्॥

इति सिद्धान्तमार्गो यदाविरासीत्प्रकाशितः। प्रभाकरसमुत्कीर्णप्रचण्डन्यायरश्मिभिः॥

---

१. अन्यथासिद्धत्वात्प्रतिपत्त्योः इति—अत्र वचनस्यानुपपत्तिः प्रतीयमाना, प्रयोगप्रतिपत्त्योः कल्पनमनुमनुते। उत्तरत्राप्येवमेव प्रयोगप्रतिपत्त्योः इत्येवपङ्क्तिमुपलभामहे॥

२. गवाद्यपोहरूपेण तेषामसाधुत्वख्यापनम्—अनादिव्याकरणप्रक्रियापरिनिष्पन्ना ये गवादिशब्दाः तद्भिन्नत्वेन रूपेण गाव्यादीनामसाधुत्वख्यापनं, नतु गावीत्वादिभिरसाधारणैश्शब्दैरित्यर्थः॥

आकृतिवाचिशब्दानां व्यक्तिर्वाच्या नेति विचार्यते। वाच्येति पूर्वपक्षवादी मन्यते। तथाहि—वाच्यत्वं नाम शब्दशक्तिप्रसूतसंवेदनविषयत्वम्। तच्च व्यक्तेरप्यस्ति। तथाहि। आकृतिविषया धीः शब्दादुपजायत इति तावन्निर्विवादम्। यैव च धीराकृतिं विषयीकरोति सैव च व्यक्तिमपि विषयीकरोति, तयोरेकधीवेद्यत्वात्। कथं पुनरवगम्यते आकृतिधीः व्यक्तिमपि विषयीकरोतीति ? प्रत्यक्षबुद्धेर्दर्शनात्। गोत्वादिजातिविषया प्रत्यक्षोपलब्धिः व्यक्तिविषया नियता। अतोऽन्यापि धीर्व्यक्तिविषयेति निश्चीयते। ननु जातिसामान्यादिशब्देभ्यो गोत्वादि-बुद्धिर्जायते; अथ च न व्यक्तिविषया। तस्मात्तत्र व्यभिचारः।

अथ जात्यन्तरव्यावृत्तव्यवहारानुगुणतया जातिविषया या धीर्जायते सा व्यक्तिविषय-त्वनी [निय] तेति चेत्, एवमपि गोत्वादिशब्दजन्यबुध्यैन [द्धौ] व्यभिचारः। नैष दोषः। गोत्वादिशब्दजन्यापि जातिबुद्धिः व्यक्तिमपि विषयीकरोति। एकधीविषयत्वेऽपि जातिरेव नित्यम् तस्माद्बुद्धेन [द्धौ] प्रधानतया प्रतिभाति। गवादिशब्दजन्यायां तु जातिबुद्धौ कदाचिद्व्यक्तिः प्रधानतया, कदाचिज्जातिरित्येवं विशेषः। तस्मादेकार्थवेद्यत्वादाकृतिव्यक्त्योर्व्यक्तिरपि शब्दार्थ इति पूर्वपक्षवादी मन्यते।

राद्धान्तस्तु—न व्यक्तिः शब्दवाच्या। तथाहि—संविदं प्रति शब्दस्य कारणतामुपपादयितं यदर्थावच्छिन्नसंविदनुगुणा शक्तिः कल्प्यते सोऽर्थः शब्दवाच्यः। तत्र जातिसंविदनुगुणशक्ति-रेवोपपादकतया कल्पयितुं युक्ता, जातिसंविदनुगुणशक्तिकल्पनयैव जातिव्यक्तिस्फुरणोपपत्तेः। जातिबुद्धौ जातायां तथैव तद्धीवेद्या व्यक्तिरपि विषयीक्रियते। नन्वेवं सति व्यक्तिबुद्धावपि शब्दस्य कारणत्वात् तत्रापि शब्दस्य शक्तिरङ्गीकृता भवति। मैवम्। जातिसंवित्कारणत्व-प्रयुक्तयैव शक्त्या व्यक्तिविषयसंविदो त्युपपत्तेः न तत्र शक्तिः कल्पयितुं युक्ता। यद्यज्जाति-संवित्कारणं तत्सर्वं व्यक्तिसंविद्यपि कारणम्। एवं जातिसंवित्कारणान्तरे प्रत्यक्षादौ व्याप्ति-र्गृहीता। तथैव शब्देऽपि जातिसंवित्कारणत्वात् शक्तिरवगता। तथैव व्यक्तिसंविदुपपत्तेर्न शब्दकारणत्वप्रयुक्तशब्दप्रतियोगित्वं व्यक्तेरिति न व्यक्तिः शब्दवाच्येति सर्वमवदातम्।

सामान्यवाचि शब्दानां व्यक्तिवाच्यत्वदूषणम्।
सुबोधं क्षीरसमुद्रवासिमिश्रेण वर्णितम्॥

इह उभ्दिदादिशब्दानां कर्मणि संभवत्प्रवृत्तिनिमित्तानां कर्मसामानाधिकरण्ययोग्यतया निर्दिष्टानां कर्मनामत्वं भवितुमर्हति। [1]अथ किमिदं नामत्वम? मुख्यया जघन्यया[वा]वृत्या अनेकार्थ-प्रतिपादनयोग्यत्वे सत्यपि कस्यचिदेव प्रतिपादकत्वं, यथा पङ्कजादिशब्दानाम्। पङ्कजशब्दो हि पङ्कजननयोगेन पद्मकुमुदकर्पूरादिप्रतिपादनयोग्योऽपि नियमेन पद्ममेव प्रतिपादयति, न कुमुदादीनीति नामेत्युच्यते। ननु शक्त्यविशेषे सति किमिति कश्चिदेव प्रतिपादयति, न सर्वम्? अन्यत्राप्रयोगादिचेत्, तदयुक्तम्; न हि पूर्वप्रयोगोऽपि प्रयोगकारणम्, किन्तु शक्तिरेव; सा चावयवद्वारा सामान्यतोऽवगता; अथावयवशक्त्यविशेषेऽपि समुदायस्य पूर्वप्रयोगाभावेन अनादित्वाभावादसाधुत्वम्; असाधोश्च प्रयोगो निषिद्ध इति न प्रयोग इति चेत्, तदयुक्तम्;

१. अत्र किमिदं नामत्वमिति नाम्नोनिर्वचनं यत्तत् योगरुढनामपरं; न तु केवलरुढनामपरं; 'मुख्यया' 'जघन्यया' इति क्रियमाणस्य लक्षणस्य तत्रैव संभवात्; प्रकृतत्वाच्चोद्भिच्छब्दस्य तादृशस्य॥

इतः पूर्वमदृष्टप्रयोगाणां...किंकेत्येवमादीनामप्यप्रयोगप्रसङ्गात्। अथ तेषां व्याकरणेऽनुशासनादना-दित्वमवगम्यत इतिचेत् तर्हि पङ्कजादीनामप्यनुशासनादनादित्वप्रसङ्गः।

अथ सर्वेष्वर्थविशेषेषु नाहत्यानुशासनमिति नानादिमत्वमिति चेत्, तन्न; इह किंकादीना-मपि सर्वेषां नाहत्यानुशासनमित्यनादित्वं न स्यात्। अथ तेषां सामान्येनानुशासनात् अनादित्वं सर्वेषामितिचेत्, पङ्कजादीनामपि अर्थसामान्येनानुशासनादनादित्वं सर्वत्र सिद्धम्। तस्मात् पङ्क-जादिशब्दैः अर्थान्तराप्रतिपादने समाधिर्वक्तव्यः। अत्र केचिन्नीतिज्ञंमन्याः समाधिमास्थिषत। अव-यवऽशक्त्यविषये [शेषे]ऽपि समुदायस्य प्रतिनियतार्थविषया शक्तिः कल्पते। तया व्यवस्थासिद्धिः। ननु समुदायशक्तौ सत्यामपि अवयवशक्त्यविशेषात् किमित्यन्यत्रापि प्रयोगो न भवति, [अवय-वशक्ति] समुदायशक्त्योर्निमित्तत्वात्। किमिदं नियमनमन्यत्र तयोः प्रतिबन्धनम्? तर्हि कथं प्रयोगप्रतिपत्तिः? अवयव [समुदाय] शक्त्योरपि व्याप्रियमाणत्वात्; तत्र समुदायशक्त्या जातिः प्रतीयते; अवयवशक्त्या योगः प्रतीयत इति पङ्कजादिशब्दैरुभयाकारोऽर्थः प्रतीयत इति व्यवस्थोपपत्तिरिति। अविचारितचारुत्वादेष पक्षो [वि] हीयताम्। "प्रमाणत्राधितं पक्षं न हि गृह्णन्ति सूरयः"॥ न समुदायशक्तिः कल्पयितुं शक्यते, प्रमाणाभावात्; व्यवस्थानुपपत्तिः प्रमाणमिति चेत् न; तस्यामक्लृप्तप्रायाया[या]मपि व्यवस्थोपपत्तेः। तथाहि—अवयव ऽशक्त्यविशेषाते किमन्यत्रापि प्रयोगो न भवति?

समुदायशक्त्या नियमितत्वादिति चेत्, तर्हि अवयव शक्तिः [किं] नियमनशक्तिरपि समुदायशक्तेः कल्पयितव्या स्यात्; किञ्च। अवयवशक्त्या समुदायशक्त्या च युगयद्व्यापारो प्याश्रयणीयः। न चायं प्रकारः क्वचिदपि दृष्टः। न हि सकृत्प्रयुक्तः शब्दः शक्तिद्वयेन व्याप्रियमाणो दृष्टः। तस्मात् दृष्टविरोधात् कल्पनागौरवापत्तेश्च न समुदायशक्तिः कल्पयितं युक्तेति न योगरूढिर्न्याय्या। अत्रोच्यते। अवयवश [क्ते] क्त्योरविशिष्टत्वेपि पङ्कजादिशब्दैः न सर्वार्थप्रतिपादनं, इतरेतरसमवधानेन प्रतिबद्धशक्तित्वात्, अवयवयोः पङ्कशब्दसंनिधानेन जशब्दस्य कुमुदादिगतजननाभिधानं प्रतिबध्यते। जशब्दसन्निधानाच्च पङ्कशब्दस्य कुमुदा-द्यपेक्षया पङ्कस्याधारभावाभिधानं प्रतिबध्यते। कथमन्योन्यसमवधानं प्रतिबन्धकमित्यवगम्यते, कदाचिदप्यन्यत्र कार्य [र्या] दर्शनात्। न हि लोके क्वचिदपि कुमुदाद्यभिधानं पङ्कजशब्देन दृश्यते। ननु इदानीमभि [धानादर्शनात्] धानं पूर्वकालेऽप्यभिधानं नास्तीति कथमव-गम्यते? अनुमानादिति वदामः। पूर्वकालः पङ्कजशब्देन कुमुदाद्यभिधानशून्यः, कालत्वात्, इदानींतनकालवत्। यद्येवं वाचकादिशब्दानामपि यत्र प्रयोगदर्शनं तस्यैवाभिधानं, नान्येषाम्; सत्यं; यदीदृशएवार्थे वाचकादिशब्दानां प्रयोग इति व्यवस्थोपलभ्येत; न चोपलभ्यते; तस्मान्न तेषु नियमनम्। यदि पङ्कजशब्दयोरन्योन्यसन्निधानेन प्रतिबन्धः तर्हि तामरसे [प्य] त्यभि-धानं न स्यात्; न; एकस्या एव शक्तेरनेककार्यजनकत्वेऽपि किंचिदेव कार्यं प्रतिबध्यते, न सर्वमपि [मिति] दृष्टम्; यथाग्नेर्दाहकशक्तेरेकत्वेऽपि काष्ठगतदाहो न प्रतिबध्यते मन्त्रेण, किंतु अङ्गुलिगत एव; तस्मान्न दोषः। तस्मात् शक्त्यविशेषेऽपि पङ्कजादिशब्दानां व्यवस्थित विषयत्वान्नामत्वम्। तथा उद्भिदादिशब्दानामपि योगशक्त्यविशेषेऽपि कस्यचिदेव योगस्य प्रति-पादकत्वम्, न सर्वेषामपि। नामत्वं कथमवगम्यते? यजिसामानाधिकरण्यात्। किमिदं सामाना-

धिकरण्यम्। स्वाधीनप्रवृत्तिनिवृत्तिवशेन यज्यभिहितार्थपरतया प्रयुक्तत्वम्। तद्वशेनान्यत्राप्रयोग-सहितेनास्यैव योगस्य प्रतिपादकमित्यवगम्यते। कथं पुनस्सामानाधिकरण्यमवगम्यते? प्रकारान्त-रेण विध्येकवाक्यत्वानुपपत्तेः। यद्युद्भिच्छब्दः खनित्रवचनतया प्रयुज्येत तदा तस्यैव वाक्य-[च्य]त्वं नोपपद्यते, खनित्रस्य विधातुमनुवदितुं चाशक्यत्वात्; न तावद्विधातुं शक्यते; भावार्थस्य विधेयत्वात्। [1]विधिर्हि स्वरसतः साध्यार्थविषय इति साध्यात्मकत्वात् विहितस्यचा-प्रत्यभिज्ञानात् भावार्थ एव विषयोऽवगम्यते। तस्मिंश्च विधेये यदि गुणोऽपि विधेयः स्यात् तदानीं लक्षणा वाक्यभेदो वा स्यात्, तत्र यदि [2]सामान्येन गुणो विधेयः स्यात्, तदानीं मत्वर्थ-लक्षणा स्यात्; वैयधिकरण्येन विधाने विरुद्धत्रिकद्वयापत्त्या वाक्यभेदः स्यात्। अथ किमिदं विरुद्धत्रिकद्वयम्? अज्ञातत्वम्, गुणत्वं, उपादेयत्वंचेति त्रिकम्; ज्ञातत्वं प्रधानत्वं उद्देश्यत्वंचे-त्यनेन त्रिकेण विरुध्यते। कथं पुनरत्र विरुद्धत्रिकद्वयापत्तिः? फलभेदेन संबध्यमानस्य यजेः केवलसाधनावस्थे स्वार्थे वृत्तिरुपेया, साधनस्यैव साध्यसंबन्धार्हत्वात्; तदा च साधनावस्थः प्रतीयते।

तदैवाज्ञातादि त्रिकं प्रतीयते। यदा गुणेन संबध्यते तदा केवलसाध्यावस्थैव प्रतीयते। साध्यस्यैव साधनसंबन्धार्हत्वात्। यदा च साध्यावस्थः प्रतीयते, तदैव ज्ञातत्वादिकम्—इति न-सकृदुच्चरितेन त्रिकद्वयान्वितार्थः प्रतीयते। ननु आख्यातादिष्टफलभेदसाधनोपहितो धात्वर्थः प्रतीयते। साधनता च साधितस्यैवेत्यर्थात्साध्यत्वमपि प्रतीयते। तत्र साधनावस्थयाऽज्ञातादिकं प्रतीयते साध्यावस्थया ज्ञातदिकमिति नास्ति विरोधः। अस्तीति वदामः। यदाच केवलसाधना-वस्थोद्भूतिः; तदैव साध्यसंबन्धः, यदा च केवलसाध्यावस्थोद्भूतिः; तदा साधनसंबन्धः। उद्भूतोभयावस्थस्य द्वाभ्यामपि संबन्धो न घटते। तस्मादन्यतरावस्थायामोवोद्भूतिरिति त्रिकद्वय विरोधोऽस्त्येव। तत्परिहाराय यज्यावृत्तिमाश्रित्य वाक्यभेदोऽङ्गीकार्यः। तस्मान्न वैयधिकरण्येन गुणो विधातुं शक्यते। कर्थं तर्हि "सोमेन यजेत" इति गुणविधिः? विशिष्टविधानादिति वदामः। क्रियाकारकसमन्वयवशेन विशिष्टो यागस्तत्र प्रतीयत इति स विधीयते। ननु उद्भिदा इत्यपि विशिष्टयागेऽवगते विविष्टविधिर्वक्तुंशक्यते। मैवम्। फलकारणतया हि यागस्तत्र प्रती-यते। न च करणस्य स्वकारकान्वयार्हता, किंतु साध्यस्य, इति नात्र विशिष्टयागावगतिर्वक्तुं शक्यते। "सोमेन यजेत" इत्युत्पत्तिवाक्ये साध्यतयैव यागः प्रतीयत इति स्वकारकान्वयार्हतया विशिष्ट-यागावगतिर्वक्तुं शक्यते। तस्मात्तत्र विशिष्टविधानोपपत्तिः। यद्येवं "समिधो यजति" इत्यपि विशिष्टविधानं किमिति न भवति। मन्त्रलिङ्गादेव समिदादीनां प्राप्तत्वात् तत्प्रख्यन्यायेन नामत्व-

---

१. विधिर्हि स्वरसतः – विधिविषयो धात्वर्थ एव। न तु द्रव्यादि इति वचनं प्रकृतम्; तत्र धात्वर्थस्यैव विधि विषयत्वे युक्तिद्वयमुच्यते; स्वरसतः साध्यार्थविषय इति साध्यात्मकत्वादित्येको हेतुः। 'विहितस्यचाप्रत्यभिज्ञानात् इति द्वितीयः। पूर्वं परिचित एव प्रत्यभिज्ञाया विषयभावमनुभवितुमलम्; द्रव्यादिः परिचितत्वात् प्रत्यभिज्ञायेत। तथाच अज्ञातार्थबोधकत्वरूपं विधित्वं विधेर्नस्यात्। अतो विधिविषयस्याप्रत्यभिज्ञायमानत्वं नियतम्। तच्च भावार्थ-स्यैव घटते इत्यभिसन्धिः॥

२. सामान्येन गुणो विधेयः – अत्र सामान्येनेत्यस्य स्थाने 'सामानाधिकरण्येन' इति पाठः स्यात्। अथवा—सामान्येनेत्यस्य–एकरूपेण, करणत्वेन इति व्याख्यानं वा संभावितमाकलयामः॥

मेव समिदादिनां युक्तम्। [1]यद्येवम् "राजा राजसूयेन स्वाराज्यकामो यजेत" इति कथमत्र राजार्थविधिः? अत्र हि फलसाधनतया यागः प्रतीयत इति विशिष्टविधिर्न संभवति। उच्यते। नात्र राजार्थो विधीयते। किंतु कर्तृविशेषणद्वारेण संख्याविशिष्टे राजार्थो विषयविशेषणम्। तेन राजकर्तृसंख्याविशिष्टयागविषयको नियोगः प्रतीयत इति। तथाभूते च नियोगे विषयानुष्ठानशक्तस्य राज्ञ एव स्वाराज्यकामिनो नियोज्यत्वमापतति। यस्य च नियोज्यत्वं तस्यैव कर्तृत्वं नियोग आक्षिपतीत्यर्थात् राज्ञ एव कर्तृत्वं न तु विधेयतयेत्यदोषः। "एतस्यैव" इत्यत्र वारवन्तीययागयोः स्वान्तत्वात्समानकर्तृकत्वं प्रतीयते। कर्त्रैक्यं च क्रियाया एकत्वादित्येकक्रियाभूतयोरेवविधानात् न पृथग्विधेयतेति न तत्रापि विरुद्धत्रिकद्वयापत्तिः। "दशापवित्रेण ग्रहं संमार्ष्टि" इत्यत्रापि पदनिमत्तकान्वयदशायां न संमार्गस्य वैरूप्यमस्ति। ग्रहेणापि संबध्यमानस्संमार्गस्साध्यतयैव प्रतीयते, ग्रहस्तु कारकतया, पश्चात् कार्यवशेन ग्रहस्य प्राधान्यं संमार्गस्य गुणत्वं चेति न तत्रापि वाक्यभेदः। "व्रीहीनवहन्ति" इत्यत्र साधनीभूता व्रीहयः प्रतीयमाना स्वोपकारेणावघातेन कथमन्वीयन्त इति चेदुच्यते। कार्यान्तिरसाधनीभूतस्यैव विधेयान्वय इति विधेयभूतावघातान्वयाय शास्त्रान्तरसिद्धं साधनत्वमनूद्यमानमनुगुणतयैवावतिष्ठत इति न विरोधः। अतः स्थितं न वैयधिकरण्येन गुणस्य विधेयत्वमिति। नाप्यनुवादः संभवति, अप्राप्तत्वात्। अतश्च उद्भदनकारित्वलक्षणप्रवृत्तिनिमित्तवशेन कर्मण्येवायं प्रयुक्त इति सामानाधिकरण्यावगमात् नामत्वसिद्धिः। ननु नाम्नः किं कुर्वतो विधि [पदै] वदेक वाक्यत्वम्? विधिसंबन्धिकारणबोधोत्पादकत्वात्। नन्वसौ यजिनैव सिद्धः। सत्यम्, सिद्धेऽपि तस्मिन् अनुवादरूपबोधो नाम्ना जायते। न चासावनुष्ठानानुपयोगी, किं तु साभ्यासानुभवसंस्काराधानद्वारेण स्मृतिहेतुत्वादनुष्ठानोपयोगीति विधिप्रयोजनबोधजनकतया विध्येकवाक्यत्वं वेद्यमित्यखिलमनवद्यम्॥

इतिश्रीक्षीरसमुद्रवासिमिश्रविरचितं नामधेयनिरूपणं समाप्तम्॥

---

१. अत्र च प्रकरणे उद्भिद्वाक्यात्सोमवाक्यस्य, तस्माच्च समिदादिवाक्यानां च वैलक्षण्यं सोपपत्तिकं प्रतिपादयति ग्रन्थकृत्॥